णं चरेत्॥ इति यदपि बार्हस्पत्यं॥ गौडी माध्वी सुरां पेष्टीं पीत्वा च विप्रः ३५
समाचरेत्॥

तन्मन्ये बुद्धिपूर्वकं चांद्रायणमनुकं मासः इति॥ तत्त्रितयमप्यन
न्योषधसाध्यवाय्वाफेधकोपशमनार्थे पाने सत्र वेदितव्यं॥ प्रायश्चि
त्तस्याल्पत्वात्॥ यथाऽऽह मनुः॥ अज्ञानात्प्राश्य विण्मूत्रं सुरासं
स्पृष्टमेव वा॥ पुनः संस्कारमर्हंति त्रयो वर्णा द्विजातयः॥ इति॥ यथा बौ
धायनीये॥ सुरापानस्य यो भांडे अपः पर्युषिताः पिबेत्॥ शंखपुष्पी X
विपक्वं तु क्षीरं स च पिबेत् त्र्यहं॥ इति॥ तत्पर्युषितादधिकं॥ अकाम
तोऽभ्यासेन मनुनोक्तं॥ अपः सुराभाजनस्था मद्यभांडस्थितास्त
था॥ पंचरात्रं पिबेत्पीत्वा शंखपुष्पीशृतं पयः॥ इति विष्णुसंहि
केऽस्मराद्यमाद्यमिति पूर्वे चिकृषयः॥ सुराभांडस्थितं तोयं यः कश्चि
त्पिबति द्विजः॥ स द्वादशाहं क्षीरेण पिबेद्ब्राह्मीसुवर्चलामिति॥ X

सुरापस्य च योगंधं मुखमाघ्राय सोमपः। प्राणानप्सु त्रिरायम्य
घृतं प्राश्य विशुध्यति। इति। तत्सोमपायिन एवामतिपूर्वे ब्राह्म
णो। अन्यस्य तु नातित्रिंशकरं कमंठिचाऽन्यतममिच्छया। चरेच्छी
तपनं तप्तकृच्छ्रं प्राजापत्यमनिच्छयेति मनूक्तं द्रष्टव्यं। अथाऽद्दष्टव्
यमः। मद्यभांडस्थितं तोयं यः कश्चित्पिबते द्विजः। कुशमूलविप
क्वेन त्र्यहं क्षीरेण वर्तयेदिति। अज्ञानतोऽभ्यासे तु वसिष्ठः। म
द्यभांडस्थितं तोयं यदि कश्चित्पिबेद्द्विजः। पद्मोडुंबरबिल्वा
नां पालाशस्य कुशस्य च। एतेषामुदकं पीत्वा त्रिरात्रेण विशु
ध्यति। इति। एतद्द्वयमपि अज्ञानतः। ज्ञानतस्तु विष्णूक्तो। मद्य
भांडस्थितं तोयं यदि कश्चित्पिबेत्तु द्विजः। पंचरात्रं पिबेत्तु पीत्वा २६

शंखपुष्पीशृतं पयः। ज्ञानतोऽभ्यासे शंखः। मद्यभांडस्थितं तो
यं पीत्वा सप्तरात्रं यावकं गोमूत्रं पिबेदिति। अत्यंताभ्यासे हारी
तः। मद्यभांडस्थितं तोयं यदि कश्चित्पिबेद्द्विजः। द्वादशाहं तु प
यसा पिबेद्ब्राह्मीं सुवर्चलां। एषु वाक्येषु द्विजग्रहणं ब्राह्मणा
भिप्रायं। क्षत्रियवैश्ययोरप्रतिषेधात्। इति द्विजातिप्रकरणं। इदं च
गौडीमाध्वीभांडस्थविषयं। दारुचा तु प्रायश्चित्तस्यातालादिमे
द्यभांडोदकपाने तु कल्प्यं। अथ द्विजातिनार्यं प्रत्याह। पतिलो
कं न सा याति ब्राह्मणी या सुरां पिबेत्। इहैव सा शुनी गृध्री सू
करी चोपजायते। ब्राह्मणीग्रहणं चाऽत्र तिस्रो वर्णानुपूर्व्येणेति
न्यायेन यस्य द्विजातेर्या विवोढा भार्या सा तदुपलक्षणं। अत एव मनुः

पतत्यर्द्धंशरीरस्य यस्य भार्या सुरां पिबेत्। पतितार्द्धशरीरस्य
निःकृतिर्नविधीयता इति धर्माधिकामेषु सुराधिकाद्दंपत्न्योरे
कशरीरत्वमेवातः पतितार्द्धशरीरस्येति तस्या द्विजातित्वा
त्ययासुरापानपातव्या। आताद्विजातीनां यथा प्रतिषेधस्त
थात्तषां नायस्त्रिः सुरापातव्या इति। अतो द्विजातिनायस्त्रिः
सुरापानप्रायश्चित्तं स्यार्द्धं कार्यं। शूद्रभार्यायाः शूद्रायाः सु
शूद्रवदेव प्रतिषेधः॥ इति सुरापानप्रायश्चित्तं॥ ॥ अथ
क्रमप्राप्तं सुवर्णस्तेयप्रायश्चित्तं॥ ब्राह्मणस्वर्णहारी च
राज्ञे मुशलमर्पयित्वा स्वकर्म ख्यापयत्स्तेनदत्तो मुक्तोऽथ ३७
वा शुचिः। तेन राज्ञा दत्ता वा मुक्तो वा शुद्धो भवति यथा। सु

कोदत्तु तदघं राज्ञि व्रती न ब्राह्मणेन्याशयः। अपहरणत्रोक्षेन
समक्षं परोक्षं वा बलाच्चौर्येण वा क्रयादिस्वत्वदेहं विनायदेणासु
च्यते। तथा च मनुः। स्कंधेनादाय मुशलं लकुटं वापि खादिरं
सिचोऽन्यतस्तीक्ष्णं आयसं दंडमेव वा इति। तथा च। ततो मुशल
मादाय स हन्यात्तु तं स्वयं। यदि जीवति स स्तेनस्ततस्तेयाद्विमुच्य
ते। इति यथोक्तं ब्रह्मवध॥ मृतः कल्मषदानोवाऽजीवन्नपि विशुध्य
ति। इति। विप्रयद्वर्णं सामान्येन नरमात्रोपलक्षणं प्रायश्चित्ती
यते नर इति वाक्यात् राज्ञा च हननं। ब्राह्मणव्यतिरिक्तस्य। नडाकु
ब्राह्मणं हन्यात् सर्वपापेष्ववस्थितमिति। मानवे ब्राह्मणवधस्य
निषिद्धत्वात् वधेन शुध्यति स्तेनो ब्राह्मणस्तपसैव वा इति। ब्राह्मण

स्य विकल्पविशेषोऽयं न पश्चरणलक्षणः॥ किंतु प्राणांतिकमेव।
कामकरणादतद्भ्रमरणांतिकं मतिपूर्वं सुवर्णस्तेयविषयं। यतः।
मरणांतं हि यत्प्रोक्तं प्रायश्चित्तं मनीषिभिः। तच्च कामकृते पापे
विज्ञेयं नात्र संशयः॥ इति मध्यमांगिरःस्मरणात्॥ अत्र च सुवर्ण
शब्दः परिमाणविशिष्टहेमद्रव्यवचनो न जातिमात्रवचनः। त
था चाहुः षट्त्रिंशन्मते। वालाग्रमात्रे पङ्क्ते प्राणायामं समाचरे
त्। लिक्षामात्रेपि च तथा प्राणायामत्रयं बुधः॥ राजसर्षपमा
त्रे च प्राणायामचतुष्टयं। गायत्र्यष्टसहस्रं तु जपेत्पापविशुद्ध
ये। गौरसर्षपमात्रे तु सावित्रीं वै दिनं जपेत्। यवमात्रे सुवर्णस्य ३८
प्रायश्चित्तं दिनद्वयं। सुवर्णकृष्णलेचैकमपहृत्य द्विजोत्तमः। गो

कृच्छ्रं सांतपनं चैव तत्तु पापस्यापनुत्तये। अपहृत्य सुवर्णस्य मा
षमात्रं द्विजोत्तमः। गोमूत्रयावकाहारस्त्रिमासि विशुध्यति।
सुवर्णस्यापहरणे वत्सरं यावकी भवेत्॥ ऊर्ध्वं प्राणांतिकं ज्ञेयं अ
थवा ब्रह्महा व्रती। इदं च वत्सरं यावकाशनं किंचिन्न्यूनसुवर्णापह
रविषयं। क्षत्रियाद्यपहर्तृविषयं। तथा चाबलात्ये कामकारेण
स्तेनं ति तु नराधमाः। तेषां तु बलहर्तृणां प्राणांतिकमिहोच्यते।
सुवर्णपरिमाणाद्यव्यविगपि च लिप्रेतं। अथ प्रायश्चित्तांतरमाह
अनिवेद्य नृपे शुद्ध्येत्सुरापव्रतमाचरन्। आत्मतुल्यं सुवर्णं वा द
द्याद्वा विप्रतुष्टिकृत्। यदा पुनरीदृशं द्रव्यमेव द्वांतूद्दामकुडवपरि
रक्षणार्थमपहरति तदात्र त्रिप्रतिपादितं। षडब्दं वा चरेत्कृच्छ्रं

यज्ञे घातक ब्रनाच्छिन्नः। तीर्थानिवाश्रमेद्विघानृततस्तेया च्छिनुयते।
इति। चतुर्विंशतिमताश्च यथा॥ रूप्यं रुचाच्छिन्नोमाहातुवरस्त्रीणां
यणा व्रतां मघाणदशा का इदमात्रानातृच्छिपुणे नैवेद्मुआस्पदुस्त्रा चरे२
सुश्रियुणं कुर्वं देमविधिः स्मृतः। सर्वेषां धान्यलोहानां वाराकं वस
मावरेतुधान्यानां हरणे कृच्छ्रं तिलानामेदं वं स्मृतं। रत्नानां हरणे
विप्रश्चरेद्वांद्रायणव्रतमिति॥ पुनःस्तदेवगघाणकसदस्त्रात्रनमा
त्रमूल्यादस्तुवर्णस्त्रेयसममेवप्रायश्चित्तं रजतस्य। रत्नादीनां च
मूल्येनसमता। इति सुवर्णस्तेयप्रायश्चित्तप्रकरणं॥ ५॥ अथ गुरु
तल्पगप्रायश्चित्तं। यथा। तत्रैयाज्ञायनेसार्धमायस्यायोपिता च
पत्ताइद्दीवोच्चयवृषणौ नैर्ऋत्यां वो स्फुडेतसुं। समावायुरुतल्प ३९

वि२

गस्तिवक्ष्यमाणो। तत्र अयःशयने यथा मरणाद्दमं भवतितपादे दस्तुस्य
जेनूयुवर्गिनगमनं मयात्र तमिच्छेचंद्यकम्खिाप्यकुर्यतामन्त्रः। गुरुत
ल्पाऽनिनाष्येनमते ग्युप्पादयोमये। श्वमी। इलंतीवा लिप्येन्कचकना
सविश्रुध्यतीति। इयं तत्र परस्परा का हायां तत्रैयाज्ञायनेन्वायःपकस्य
श्यम्पाछिंगनमिति। यथा च मनुः। स्वयं वा शिश्नवृषणावुत्कृत्याधाय
चांजलौ। नैर्ऋतीं दिशमातिष्ठेदा निपाताद जिह्मगः। इति गुरुण
द्वै शिश्नवृषणाबुत्कृत्याष्टमनवक्ष्यमाणा ब्रह्मोत्तिरिखः। यदि त्रकु
घादिना प्रतिबंतसत्रैव तिष्ठेदा प्रलयादिति विमिष्टः। यथादनारक
ग्र आसामन्यतमां गच्छन्नैरुतल्पगः च्यतो। शिश्नस्योत्कर्तनात्तत्रना
न्यो दंडो विधीयते इति। एवं च लिंगाधिककर्तनं दंडार्थमपि पापक्षयार्थ
वति। उक्तं च मनुना। राजभिर्धृतदंडास्तु कृत्वा पापानि मानवाः। निर्म

लाः स्वर्गमायांति संतः सुकृतिनो यथा। धनदंडेन शुद्धा नः प्रायश्चित्तं क
र्त्तव्यं भवश्येवा तथा। प्रायश्चित्तं प्रकुर्वाणाः सार्व वर्णा यथोदितं। नांकया
राज्ञा ललाटे तु दाप्या स्त्रत्रमसाहसमिति। तानेवालकवाग्तास्त्रनयो
श्चमरणांतिकयोरन्यतरानुष्ठानेन गुरुतल्पगः शुध्येत्। गुरुशब्द
या श्चात्र मुख्यवृत्त्या पितरि वर्त्तते। यतः। निषेकादीनि कर्माणि यः क
रोति यथाविधि। संभावयति चान्नेन स विप्रो गुरुरुच्यते। तै इति
तथा। स गुरुर्यः क्रियां कृत्वा वेदमस्मै प्रयच्छति। व्यासः। गुरुर्वामा
तृपितृपत्न्याचार्यविद्यादातृज्येष्ठभ्रातरस्तु विज्ञेया नयत्रतात्र
न्नदातारो। इति। गुरुशब्दोऽत्र मुख्यत्वेन पितर्ये वाऽनुबध्यते। यतः ५०
संवर्त्तेन स्पष्टमेव पितृदारव्यहर्णं कृतं। पितृदारान् समारुह्य मा

तृवर्ज्जं नराधम इति। अतः पितृपत्नीगमनमेव महापातकं गमनं
त्वचरमधातु विसर्गपर्यंतं कथ्यते। अतश्चतोऽवाकि[illegible]तो नमहा
पातकत्वात्तत्रेतरे देंत स्थेयः रायनेसार्द्धमित्यादिकं म[illegible]ांतिकप्रा
यश्चित्तद्रष्टव्यं। तच्चा जनन्यामकामतस्तत्समपत्न्यामुत्तमवर्णायां
वकामतस्तद्दृष्टव्यं। तथा। पितृभार्यां चविज्ञाय सपत्नीं योऽधिगच्छति।
जननीं वाऽप्यविज्ञाय मृतः शुद्धिमवाप्नुयात्। इति षट्त्रिंशन्म
तोऽनिधनाद्वा। जनन्यां तु कामतः कृते तु वासिष्ठं। निष्कालको घृताक्तो
गामप्याऽग्निनापादप्रवृत्ति आत्मानमवदाह्येदिति दृष्टव्यं। अका
मतोऽप्यासप्य तदेवात्र वृद्धमातुः सपत्नी भगिनी आचार्यतनयोत X
थात्। आचार्यपत्नी स्वसुतां गच्छंश्च गुरुतल्पगः। इत्यतिदेशाऽनिधनाद्वा।

अथारुमतं॥ क्षेत्रजादीन्सुतानेतानेकादश यथोदितान् पुत्रप्रति
निधीनाहुः क्रियालोपान्मनीषिणः॥ इति॥ इदं च मुख्यासंभवे पुत्रस्य
सवर्णायां मातरि मरणांतो इतरेषां पुनः पुत्रकार्यकरत्वमेव॥ न तु
त॰ त्रवीं तत्रो नयेच्छांप्रदत्तोत्तमेषुः शायन इति प्रथमं प्रायश्चित्तं॥ तेन
प्रोत्सादते नो त्रयं द्वादशाब्दमिति द्वितीयं॥ तथा मोसादितसप्तमा
नवींपतयोरन्यतरं दृष्ट्वा यद्दृष्टशिरवेन॥ द्वादशवर्षिकं॥ यथा॥
अधःशायी जटाधारी पर्णमूलफलाशनः॥ एककालं समश्नन्
वै वर्षे तु द्वादशे गते॥ रुक्मस्तेयी सुरापश्च ब्रह्महा गुरुतल्पगः॥ व्र
तेनानेन शुध्यंति महापातकिनस्त्विमे इति॥ तत्समं च सवर्णामवर्ण ४१
पिष्टदारणमानं कामतल्पगः कि तद्दृष्ट्वां त्रावेव कामतः प्रवृत्त

स्यारतःस्सकादर्वाकुनिवृत्तोषड्वार्षिकं॥ अकामस्तु त्रैवार्षिकं॥
न्त्यां तु कामतः प्रवृत्तस्यारतःस्सकादर्वाकिनिवृत्तो द्वादशवार्षि
८ कं॥ अकामतस्तु षड्वार्षिकमिति॥ कल्प्यं यस्सैतु सेवनेन गुरुदा
रानुसमारुह्य मातृवर्ज्जं नराधमः॥ इत्यादिना॥ समारोहणमा
त्रेतसत्व छुद्रकं॥ सदीनवर्षैर्गुरुदारान् रतासेकादर्वाकिन्नि
इच्छा॥ प्रायश्चित्तांतरमाह॥ प्राजापत्यं चार... समातृगुरुत
ल्पगः॥ चांद्रायणं वा त्रीन्मासान् अभ्यस्य न्वेदसंहितां॥ अथवा प्र
जाप्यं लक्षं च यमाणं समावर्षत्रयं चरेद्धौ एतद्ब्राह्मणी पुत्रस्य
शूद्रजातीय गुरुतल्पागमने मतिपूर्वं दृष्ट्वा॥ यदा तु गुरुपत्नीसव
लंघ्य निचारिणी॥ अक्षच्छिप्तं वंगच्छति तदा वेदजपसीदितां॥ चांद्राय

एतत्रयं कुर्यात्। अत्रैव कामतः प्रवृत्ता वौशनसां गुरुतल्पगा नि
गामी संवत्सरं ब्रह्महाव्रतं षण्मासान्वा तप्तकृच्छ्रं चरेदिति। क्ष
त्रियागमने त्वमतिपूर्वे याज्ञवल्कीयं। मातुः सपत्नीं भगिनीं आचार्य
पत्नीं तथा। इति गुरुतल्पगव्रतातिदेशात् नववार्षिकं। इदं चा
तिदेशकं सवर्णगुरुभार्यागमनविषयं न त्वेतान्न कामतो म
रणांतिकस्य त्वकामतश्च द्वादशवार्षिकस्य विहितत्वात्। अतः क्ष
त्रियादिविषयमेवेति युक्तं। तत्रैकामतोभ्यासे मरणांतं मध्यागमा
पुनर्नार्यां शिरोः छत्रसुतां छित्वा। अंडाभ्यां सहितं लिंगं मुच्चयसमुत्तः
श्रुतेः। इति कएवस्मरणात्। अत्रैव विषये प्रायश्चित्तं यद्दानाचिकीर्षति। ५२
तदा। छित्वा लिंगं वधस्तस्य सकामायाः स्त्रियस्तथेति याज्ञवल्कीयो वध×

का ×दंडः प्रायश्चित्तस्थाने द्रष्टव्यः।

विशपायां त्वगुरुभार्यायां कामतोगमने षड्वार्षिकं। अत एवं क्ष
त्सरं। ब्राह्मणीपुत्रस्य क्षत्रियायां मातुः सपत्न्यां गमने पादन्यूनं
द्वादशवार्षिकं नववार्षिकमिति यावत्। तस्यैव तथाभूतायां वैश्या
यां षड्वार्षिकं। शूद्रायां त्रिवार्षिकं प्रायश्चित्तमिति। एवं क्षत्रिया
पुत्रस्य वैश्यायां नववार्षिकं। शूद्रायां षड्वार्षिकं। एवमेव वैश्या
पुत्रस्यापि। इति वैश्यायां तु कामतोऽभ्यासे मरणांतिकमेवाद्यो
र्नयोस्त्रियो वैश्यां गच्छतः पुनः पुनः। लिंगाग्रं छेदयित्वा तु ततः शु
ध्यति किल्बिषात्। इति लौगाक्षिस्मरणात्। शूद्रायां कामतो गच्छेत्या
से द्वादशवार्षिकं। पुनः शूद्रां गच्छेद्यदि बुद्धिपूर्वं विप्रः समाहितः। ब्र
ह्मचर्यमतश्चात्मा चरेत्स द्वादशाब्दिकं। इति त्रिपमन्यु स्मरणात्।

क्षत्रियायां गुरोर्नार्यायां च बुद्धिपूर्वगमने यमोक्तं त्रिवर्षमष्टका-
लाशनं द्रष्टव्यं कालेऽष्टमे वा भुंजानो ब्रह्मचारी सदा व्रती । स्थाना-
सनाभ्यां विहरन्त्रिरह्नोऽभ्युपयन्नपः । अधःशायी त्रिभिर्वर्षैस्तदपो-
हति पातकमिति । अत्रैवाभ्यासे कारकस्योक्तं ॥छ॥ गुरोः इतरसुतां
जायां भगिनीं वा च कामतः । अंडमात्रं समुत्कृत्य स्ववोढा जीवन्मृतोऽपि
वा इति । विप्रायां च कामतो गमने प्राजापत्यं चरेत् । तत्क्षेममित्येतदेव
याज्ञवल्कीयं । तथा च वृद्धमनुः । गमनाद्गुरुजायायाः पितृजाया-
गमे तथा । त्र्यब्दं त्रयमकामाद्बुद्धं नियं समाचरेदिति । अत्र चाभ्या-
सेऽधारीताक्तं मरणांतं ब्रह्मचर्यं । अन्यस्य विप्रास्पृष्टायां गुरोरज्ञान-
मोहितः । सचरेद्ब्रह्मचर्यं षडंगया वदाप्युषमिति । गुरोनार्यायां अज्ञा ५३

यां च मतिपूर्वे मानवं । खट्वांगी चीरवासा वा श्मश्रुलो विजने वने ।
प्राजापत्यं चरेत्कृच्छ्रमब्दमेकं समाहितः । इति । अथ वा गुरुजायाभि-
गामी कंटकिनीं शाखां संवत्सरं परिष्वज्याधःशायी त्रिषवणी नेदा-
कारः पूतो भवतीति षण्मासकं कुर्यात् । तत्र चाभ्यासे मानवं । चांद्रायणं
वा त्रीन्मासानभ्यसेन्नियतेन्द्रियः । इत्याद्यशेषविशेषा विज्ञानेश्वरोक्ताः
प्रायश्चित्ताध्याये द्रष्टव्याः ॥छ॥ इति गुरुतल्पगप्रायश्चित्तं ॥छ॥ तथा
चांडालपुक्कसानां च म्लेच्छानां गवां च योषितां । सख्याद्यमाचरेदज्ञाना-
त्तदज्ञानादेवं वह्यमिति । यमोक्तं । जनन्यां च भगिन्यां च स्वसुतायां
तथैव च स्नुषायां गमने चैव विज्ञेयमतिपातकं । अतिपातकिनः सर्वे
प्रविशेयुर्हुताशनम् । इति कात्यायनस्मरणात् । तथा च वृद्धयमेनोक्तं ॥

चांडालीं पुल्कसीं म्लेच्छीं स्नुषां च भगिनीं सखीं॥ मातापित्रोः स्वसारं च
निक्षिप्तां शरणागतां॥ मातुलानीं प्रव्रजितां सगोत्रां नृपयोषितं॥ शि
ष्यपत्नीं गुरोः पत्नीं गत्वा चांद्रायणं चरेत्॥ इति॥ यत्त्वांगिरसो वच
नं॥ पतितां च स्त्रियो गत्वा त्रीन्कृच्छ्रांश्च प्रतिष्ठत्यथो मासोपवासं कुर्वी
त चांद्रायणमथापि वा॥ इति॥ तदज्ञानयमपि कामतः प्रवृत्तस्य रेतः
सेकादर्वाक् निवृत्तौ द्रष्टव्यं॥ यदपि संवर्त्तवचनं॥ भगिनीं मातुरा
प्तां च स्वसारं चान्यमातृजां॥ एतास्त्वा स्त्रियो मोहात्तप्तकृच्छ्रं समा
तृ चरेदिति॥ एतदपि पूर्ववद्द्रष्टव्यं॥ यदा पुनरेता एवाद्यंतयत्नेवा
रिणीं गच्छति तदापीदमेव प्रायश्चित्तं द्विगुणं चांद्रायणं तत्र कृच्छ्रा
त्मकं क्रमेण कामतोऽकामतश्च प्रवृत्तौ द्रष्टव्यं॥ साधारणस्त्रीषु ५५

गुरुणोपभुक्तास गुरुतल्पदोषो नास्ति यतः॥ ज्ञात्वाकंपारदा
र्यं विकन्याद्दूषणमेव चासाधारणा[illegible]पो नास्ति गुरुतल्पगमेव पंचमं
वादिति व्याघ्रः॥ इत्युपपातकप्रायश्चित्तं॥ ५॥ अथ तत्संसर्गिप्राय
श्चित्तमाह॥ एभिस्तु संविशेद्यो वै वत्सरं सोऽपि तत्समः॥ एभिः पूर्वोक्तैः
महापातकिभिः सह संसर्ग्यं यं यो येन सहाचरति॥ सोऽपि तत्समस्तदीय
मेव प्रायश्चित्तं कुर्यात्॥ यो येन पतितानेषां संसर्गं याति मानवः स त
स्यैव व्रतं कुर्यात् तत्संसर्गविशुद्धये इति मनुः॥ तथा॥ पतितेन सह
पिबाजानन्नूसंवत्सरं नरः॥ मिश्रितस्तेन सोऽब्दांते स्वयं च पतितो भवे
त्॥ इति देवलः॥ तथा॥ यो येन संवसेद्वर्षं सोऽपि तत्समतामियात्॥ पा
दहीनं चरेत्सोऽपि तस्य तस्य व्रतं द्विजः॥ इति व्यासः॥ बृहस्पतिः॥

एकत्रासनं पंक्तिभांडपक्वान्नमिश्रणं याजनाध्यापने योनि
स्तथा च सहभोजनं नवधा संकरः प्रोक्तो न कर्त्तव्योऽधमैः सदा
इति देवलोऽपि संलापस्पर्शनिःश्वाससहयानासनाशना
नु याजकैर्नाध्यापनाद्यानात् पापं संक्रमते नृणामिति पराशर
आसनाच्छयनाद्यानात् संभाषात्सहभोजनात् संक्रामंति
हि पापानि तैलबिंदुरिवांभसीति एतावता सर्वप्रकारं महा
पातकिभिः समं संसर्गमाचरन् अवरकाले कालापेक्षया प्राय
श्चित्तव्रतयोग्यो भवति न रोगंतु तस्य मरणांतिकं वर्षाद् ऊर्ध्वं चैव
समम् इति कालापेक्षा यथा त्रिरात्रं प्रथमे पक्षे द्वितीये कृच्छ्रमाच
रेत् चरेत्सांतपनं कृच्छ्रं तृतीये पक्ष एव तु चतुर्थे दशरात्रं स्या

तु पराकः पंचमे मतः। षष्ठे चांद्रायणं कुर्यात् सप्तमे त्वैंदवद्वयं।
अष्टमे च तथा पक्षे षण्मासान् कृच्छ्रमाचरेत् इति। अकामतः का
मतः संसर्गे च पुनर्विशेषः स्मृत्यंतरेऽभिहितः। पंचाब्दं चरेत् कृच्छ्रं
दशाब्दं तप्तकृच्छ्रकं। पराकं चार्द्धमासस्यान्मासे चांद्रायणं चरेत्।
षाण्मासिके तु संसर्गे कृच्छ्रं चार्द्धमाचरेत्। संसर्गे चाब्दिके कुर्याद् यदि
षाण्मासिकं तु संसर्गे कृच्छ्रं चार्द्धमाचरेत्। संसर्गे किंचिन्न्यून इति द्रष्टव्योऽब्दे
धूं चांद्रायणं नरः इति। आब्दिके संसर्गे किंचिन्न्यून इति तथा प्रोक्तं यथा
तु पूर्वविस्मरे मन्वादि निषिद्ध आवार्षिकस्मरणान्न तथापि तान्य
दत्वानकः। पुरुषस्य यानि पतनानि मित्रानि स्त्रीणामपि तान्य
वाप्नोति संसर्गिकप्रायश्चित्तानि। अथ प्रसंगात् स्त्रीणामपकृष्ट
जातः दुष्टास्त्री ब्रह्मघ्नी च विट्शूद्रगामिन्याः प्रमाप्य भोहंति धि तु वर्णस

चांद्रायणं चरेत् मासत्रये तु ऊर्ध्वं त्रीतक्ते

मविक्रमाद्द्याद्विमुद्धयोऽद्दमकामतोवधविषयो।कामतस्तुब्र
ह्मगर्भत्रिरात्रोप्रतिलोमप्रसूतानां स्त्रीणां षण्मासिको विधिः।श्वेत
रप्रजवानां च सूतादीनां बहुदिषट्टाऽऽइतिक्रमण।अथांगिराः।को
शकृप्यथविप्रेवाब्राह्मण्याःप्रतिपादयतुवधधनुःक्षत्रियायावश्या
विश्यावधेमेथा।शूद्रायांश्चाविक्रवैश्यांद्वाद्दद्याज्जलेनरइति
ईषद्युनिचारितब्राह्मण्याऽद्विवधविशषमाहा।अत्रैतद्दृष्टांक्षत्रिय
द्वाऽसूद्रदत्पाव्रतंचरेत्।व्रतंषण्मासिकं कुर्याद्वैदेत्तुर्दद्याद्दशा
ऽथवाऽऽदंचषाण्मासिकंअकामतोब्राह्मण्याव्यापादनेक्षत्रिया
वधेचकामतस्त्वेतद्दृष्टव्यं।कामतावैश्यावधेदशधेनुर्दद्यात्।कामतः
शूद्रावधेउपपातकसाधारणप्राजंमासंपंचगव्याशनं।यथाचे ४६

कामतःशूद्रावधेउपपातकसाधारणप्राजंमासंपंचगव्याशनं।य
थाचाऽऽदप्रचेताः।अनंतमतीब्राह्मणीद्विवार्षिकीषण्मासमनुव
ति।क्षत्रियांद्वाषण्मासानुमासंत्रयंवेति।वैश्यांद्वामासत्रयं
सार्धमासंसार्धं वाविशंत्यहानिवेति॥इत्यादिस्त्रीवधप्रायश्चित्तं॥
कामतः।अन्त्यजंतंवसमुत्कर्षरोऽगामिच्चपैशुनंगुरोश्चालीकनिर्व
धःसमानिब्रह्महत्यया।ब्रह्मवपावेदनिंदाकूटसाक्ष्यंसुहृद्वधःगर्हि
तान्नान्नयोजग्धिःसुरापानसमानिषट्।निक्षेपस्यापहरणवाससा
रजतस्यचाश्वसिवज्ज्ञमणीनांचरुक्मस्तेयसमंस्मृतं।रेतःसेकःस्व
योनीषुकुमारीषुंत्यजासु।चासखुःपुत्रस्यचस्त्रीषुगुरुतल्पसमं
विदुः।परासरः।अवमानादतिक्रोधात्तृष्णेदावपरिभवाद्भयात्।उ
द्वध्यम्ह्यतनारीस्वरूपावाकर्षयन्।वृश्चेमिजनपातेषुम्हयत्तेनाश

केपिवा॥ अष्टयनिमयेल्लोकास्तेष्वात्यीतिमानवाः॥ अयशोणित
संस्पर्शे अंधेतमसिमज्जति॥ षष्टिर्वर्षसहस्राणि हत्वा मानंवस
नरोगो ब्राह्मणहंतानां विधिकता पार्थिवेनचोगतिरकेवनिर्दि
ष्टास्सर्पदष्टमृतस्यचोयेच तेषां अवाह्यरोच्याग्निदायच मानवाः॥
त्सर्वेपापसंघन्नास्तेषां वद्धाम्नि निःक्षतिं॥ तत्रवाशिष्टः॥ यत्रा
त्मत्यागिनां कुर्यात्स्नेहात्प्रेतक्रियांद्विजः॥ सतत्रचश्चरसहिते
वरेचांद्रायणव्रतं॥ संवर्तः॥ गोभिर्विप्रहतेचैव तथात्मेऽवात्मघा
तिनः॥ नाश्रुप्रपातनं कार्यं नारैः श्रेयोलिकांक्षितिः॥ कश्यपः॥ मृ
गमहिषंवराहं गंडकंसरलं ऋक्षं सिंहं व्याघ्रं मंडूकं मकर
मत्स्यान्नकलासं सर्पं नकुलं जिल्ली॥ गोधा॥ सेधा॥ वधेघ्रहोरात्रं॥ ४५

उपवासः॥ खरोष्ट्रहस्त्यश्वजानां मत्स्यमीनवधे तथा॥ चांद्रायणेन
शुद्ध्येत्तिकामतः स्त्रीवधेषु च॥ सारसक्रौंचहंसांश्चचक्रवाकं सकु
क्कुटं॥ मयूरंसरलोहंचाएकैकेन संशुध्यातिमज्जुंचतिद्विरंचैव
शुकंपारापतंतथा॥ त्र्यादिंतथा बकंहंवाश्वच्छिस्पान्नकेनाजना
त्॥ हत्यकामतः॥ चाषकाककपोतांश्च सातितित्तिरिमेव वा॥ प्राणा
यामंजलेकुर्यात् संध्ययोरुभयोरपि॥ मृगरोरुवराहाणां अजा
विकवधे तथा॥ अफालकृष्टमश्नीयात् एकरात्रमकामतः॥ खं
डरीटाडगरयोर्गृध्रस्यचनिपातनो॥ अपकाशीदिनंतिष्टेच्छिका
लं मारुताशनः॥ वृकंजंबुकहंसानां तरक्षोश्चाऽपिहिंसकः॥
तिलप्रस्थं द्विजेदद्यात् बुद्धोदिनंद्विपतूगवयाजंवरंगेषु

मद्दिषोष्ट्रनिपातने। प्रायश्चित्तमहोरात्रं त्रिसंध्यमवगाहनं।स
र्वेषां सर्वजातीनां मृगाणां वनचारिणां। अहोरात्रोषितस्तिष्ठेज्जप
ज्जातवेदसं। टिट्टिभामूकलपाकांश्च मद्गुं कुक्कुटमेव च। एवं पक्षिषु
सर्वेषु दिनमेकमभोजनं। हंसं द्रावलाकं च बकं विकारंडवादि
णः। सारसं चाषमासो च स्पर्शयेद्ब्राह्मणाय गां। परान्नार
सेधमराराकगोधमनां शङ्खमीननिपातने। वृंताकफलयुगाशी
अहोरात्रेण शुध्यति। वृंताकमिति श्वेतं। तुंबकं नलसर्पयिमूं मार्जा
रं मूषकं तथा। हत्वा त्रिरात्रं संतिष्ठेत्तस्मात्पापात्प्रमुच्यते।।छ।।
अथोपपातकप्रायश्चित्तानि।। तत्र मनुः। गोवधो याज्यसंयाज्य
पारदार्यमविक्रयः। पितृमातृगुरुत्यागः स्वाध्यायाग्न्योः सुतस्य च। ५८

गो १

परिवित्तताऽनुजेन परिवादनमेव च। तयोर्दानं च कन्यायास्तयोरे
व च याजनं। कन्याया दूषणं चैव वार्धुष्यं व्रतच्युतिः। तडागारामदा
राणां अपत्यस्य च विक्रयः। सर्वाकरेष्वधीकारो महायंत्रप्रवर्त
नं। हिंस्रौषधीनां स्त्र्याजीवोऽभिचारो मूलकर्म च। इंधनार्थमशुष्का
णां द्रुमाणामवपातनं। आत्मार्थं च क्रियारंभो निंदितान्नादनं त
नौ५ था। अनाहिताग्निता स्तेयं ऋणानां चानपक्रिया। असत्शास्त्राधि
गमनं कौशील्यं व्यसनक्रिया। धान्यकुप्यपशुस्तेयं मद्यपस्त्रीनिषे
वणं। स्त्रीशूद्रविट्क्षत्रवधो नास्तिक्यं चोपपातकं। एतदेव व्रतं कुर्यु
रुपपातकिनो द्विजाः। अवकीर्णिवर्ज्यं शुध्यर्थं चांद्रायणमथापि वा
।। अथ गोवधव्रतानंतरं याज्ञवल्क्यः।। उपपातकशुद्धिः स्यादेवं

चांद्रायणेन वा पयसा वापि मासेन पाराकेणाथवा पुनः ॥ अथा न
कुलमूषककसर्पमंडूकविडालतमस्यानां च भक्षणे चांद्रायणेन शुद्धिः ॥
विट्कुलकाकाद्युच्छिष्टं श्वनकुलोच्छिष्टं केशकीटावपन्नं च ब्रह्मसु
वर्चलां पिबेत् ॥ अतोऽपानां च भुक्तान्नं स्त्रीशूद्रोच्छिष्टमेव वा ॥ X
ग्धमांसमज्ञं च सप्तरात्रं यवां पिबेत् ॥ ब्रह्मचारी तु योऽश्नीयात्
मधुमांसं कथंचन ॥ सकृच्चापा [illegible] कृतं कृच्छ्रं व्रतशेषं समापयेत् ॥ शा
तातपः ॥ सुरामांसमत्तोऽपं च भुक्त्वा [illegible] विद्विजः ॥ ब्रह्मकूर्चो
पि वत्तु पीतः प्रकाशं स विशोधयेत् ॥ छर्दने च द्विजातीनां भिन्नजा
तान्नोऽनोपं च गव्येन शुद्धिस्यादिति शातातपोऽब्रवीत् ॥ मांडूक
स्वान्नतोऽपेषु दधि पंचगव्यं पिबेत् ॥ ब्राह्मणः क्षत्रियो वैश्यो ४७

ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वाऽथ च कामतः ॥ ब्रह्मकूर्चोऽपवासेन
त्र्याणां शुद्धिरिष्यते ॥ शूद्रस्यनाधिकारात्त्रिसावस्पाश्योपवासकः ॥
मार्कंडः ॥ विप्राशौचे तु भुक्तासांतपनं ॥ क्षत्रियाशौचे कृच्छ्रः ॥ वैश्याशौ
चे सांतपनं ॥ शूद्राशौचे चांद्रायणं ॥ आशौचे यस्य यो भुंक्ते सोप्याशौ
चस्तथा भवेत् ॥ तावद्यावदशौचं च तस्याशौचं प्रकीर्तितं ॥ आमश्राद्धे
तथा भुक्त्वा तप्तकृच्छ्रेण शुध्यति ॥ संकल्पिते तथा भुक्त्वा त्रिरात्रं क्षप
णे स्मृतं ॥ व्यासः ॥ विप्रस्य मृतके [illegible] कासंस्कारस्य सूतके च द्विजोत्त
मः ॥ अतो भुक्त्वा [illegible] पयं समाचरेत् ॥ [illegible] ॥ निव
त्ते चूडहोमे सुप्राना मकरणात्तथा ॥ चरेत्सांतपनं कृच्छ्रं भुक्त्वा वा जात
कर्मणि ॥ नताम्नेषु भुक्तान्नं संस्कारं च द्विजोत्तमः ॥ नियोगा ऽपवा

सेनशुध्येतानिंद्यभोजने॥ आपस्तंबः॥ चांडालकूपभांडेषु अज्ञा
नाद्यःपिबेत्पयः। प्रायश्चित्तं कथं तत्र वर्णे वर्णे विधीयते॥ चरेत्सांत
पनं विप्रः प्राजापत्यं तु भूमिपः॥ तदर्धं तु चरेद्वैश्यः शूद्रः पादं समा
चरेत्॥ अंत्यजैः खानिताः कूपाः सेतुबंधाश्च कारिताः॥ तेषु स्नात्वा
च पीत्वा च प्रमादान्न प्रदुष्यति॥ आधानं प्रस्थितो विप्रस्तत्राज्ञानात्
पिबेद्यदि। स्नात्वा चावानदीदोषो शिवपूर्ववर्णेष्वयं विधिः॥ बृहस्पतिः॥
अज्ञानात्तु पिबेत्तोयं ब्राह्मणो यस्तु आपदि। अहोरात्रेण शुद्ध्ये
त्प्राणायामशतेन वा॥ उच्छिष्टस्पृष्टिता आपो यदि कामात्पिबेद्द्वि
जः॥ कुशमूलविपक्वेन त्र्यहात्क्षीरेण शुध्यति॥ अंगिराः॥ क्रीतं परि
गृहीतं वा चंडालस्योदकं पिबेत्। प्राजापत्येन शुध्येत कामाद्द्विगुणमका ५०

सूतके वा द्विजोत्तमाः॥ अनातुरः स्वकेनाचा प्राजापत्यं समाचरेत्॥
संवर्तः॥ चंडालीं वा म्लेच्छीं गत्वा कथं चिकाममोहितः। शुध्येत सावित्रि
त्रं कुर्यात् प्राजापत्यं न स्पर्शकृत्॥ गिनीं मातुलानीं च स्वसारं तनयां तथा।
एता स्त्रियः स्त्रियोगवानप्यः कृच्छ्रं समाचरेत्॥ रजस्वलां च योगकृच्छ्र
स्त्रीणीं पतितां तथा। तस्याः पापविशुद्ध्यर्थं अतिकृच्छ्रं समाचरेत्॥ म
नुः॥ भ्रातृमृतस्य भार्यायां योऽनुरज्येत कामतः॥ धर्मेणापि नियुक्ता
यां स्पृष्ट्वा यो दधिषूः पतिः॥ वसिष्ठः॥ दधिषूः पतिः कृच्छ्रं द्वादशरात्रं च
रित्वा निर्विशेत्॥ एवं अयं दधिषूः कृत्वातिकृच्छ्रं चरित्वा निर्विशेत्॥ ब्रा
ह्मणी ब्राह्मणगवा कृच्छ्रमेकं समाचरेत्॥ एवं कृच्छ्रं क्षिप्त मारवाना
सेवनं स्वपचो यथा॥ दिवा निगमने विप्रः पादकृच्छ्रं समाचरेत्॥

अहोरात्रं तु षष्ठ्यादौ प्राजापत्यं च पर्वणि ॥ अनिर्वृत्ते मिदा यज्ञात
प्रयदंतुं जतद्दी ॥ अनातुरः सनिधने स्पृष्ट्वा हि न विशुध्यति ॥ बृहद्व
सिष्ठः ॥ तुरं स्नाने न तु विप्रेण स्पृष्ट्वा यदि रजस्वला ॥ शिरःस्नातस्तु शु
ध्येत प्राणायामशतेन वा ॥ स्पृष्ट्वा रजस्वलान्यान्यं सगोत्रेण कृत
र्तितः ॥ कामादकामतो वापि सद्यः स्नानेन शुध्यति ॥ असगोत्रा च सं
स्पृष्टा ब्राह्मण्या ब्राह्मणी च या ॥ एकरात्रं निराहारा पंचगव्येन शु
ध्यति ॥ रजस्वला तु संस्पृष्टा क्षत्रिण्या ब्राह्मणी तु या ॥ त्रिरात्रेण वि
शुद्धिः स्याद्व्यासस्य वचनं यथा ॥ रजस्वला तु संस्पृष्टा वैश्यया ब्रा
ह्मणी तु या ॥ पंचरात्रं निराहारा पंचगव्येन शुध्यति ॥ स्पृष्ट्वा रजस्व
लान्यान्यं ब्राह्मणी शूद्रवर्णया ॥ कृच्छ्रेण शुध्यते पूर्वा शिद्रीदा ५३

ब्राह्मणी शूद्रवर्णया ॥ कृच्छ्रेण शुध्यते पूर्वा शिद्री दानेन शुध्यति ॥ मार्कं
डः ॥ उदक्यां तु सवर्णा या स्पृष्ट्वा चेत्स्यादुदक्यया ॥ तस्मिन्नेव दिने स्ना
त्वा शुद्धिमाप्नोत्यसंशयं ॥ स्पृष्ट्वा रजस्वलान्योन्यं क्षत्रिया शूद्रवर्णया ॥
षड्भिः पूर्वोपवासैस्तु अहोरात्रेण चोत्तरा ॥ स्पृष्टा रजस्वलान्यान्यां वै
श्याशूद्र्या तथैव च ॥ त्रिरात्रात्शुध्यते पूर्वा त्वितरा तु दिनद्वयात् ॥ रज
स्वला तु नाश्नीयात्स्पृष्ट्वा चेदन्यवर्णया ॥ यावन्न शुद्धिमाप्नोति शु
द्धस्नानेन शुध्यति ॥ प्रचेताः ॥ रजस्वलायाः संस्पर्शे नाशुद्धेरस्थितोऽ
न्नं ॥ अस्पर्शस्पर्शनं चैवमिति प्राचेतसं वचः ॥ स्नानं रजस्वलायाश्च चतु
र्थेऽह्नि नियमशः ॥ कुर्यान्निवृत्ते रजसि शौचार्थं नात्र संशयः ॥ रोगेण य
द्रजः स्त्रीणामत्यर्थं च प्रवर्तते ॥ अशुद्धा न तु तेन स्यात्तासां वैकारिकं मतं ॥

साधुचारान् तावत्तस्याद्रजो यावत् प्रवर्त्तते। गम्या निवृत्ते रजसि
इष्टकर्माणि चैवांद्रिये। बृहस्पतिः। पतितान्त्यश्वपाकेन स्पृष्टा चेत्स्या
द्रजस्वला। तान्यहानि व्यतिक्रम्य प्रायश्चित्तं समाचरेत्। प्रथमेऽह्नि
त्रिरात्रं स्याद्द्वितीयेऽपि द्व्यहं स्मृतं। अहोरात्रं तृतीयेऽह्नि चतुर्थे नक्त
माचरेत्। मार्कंडः। अंत्यजादिश्वपाकेन स्पृष्टा चेत्स्याद्रजस्वला।
चतुर्थेऽहनि शुद्धायाः प्रायश्चित्तं स्मृतं बुधैः। अंगिराः। उच्छिष्टेन तु
संस्पृष्टा कदाचित्स्त्री रजस्वला। यावन्न शुद्धिमाप्नोति नाश्नीया
त्तावदेव तु। रजस्वलां स्पृशेत् श्वानं तमादाय दिनं कदाचित्। उपो
ष्य रजनीमेकां पंचगव्येन शुध्यति। रजस्वलां तु संडाना चंडाला
दीन् स्पृशेद्यदि गोमूत्रयावकाहारा षड्रात्रेण विशुध्यति। रजस्व ५४

ला यदा दष्टा शुना जंबुकरासभैः। पंचरात्रं निराहारा पंचगव्ये
न शुध्यति। व्यासः। निवृत्ता यानारी रजसा स्नमाभिहुता। कथं तस्या
न वक्षौचं शुध्यते केन कर्मणा। चतुर्थेऽहनि संप्राप्ते स्पृशेदन्यां
तदा स्त्रियं। सा सचैलावगाह्यापः स्पृष्ट्वा स्पृष्ट्वा पुनः स्पृशेत्। स्पृष्ट्वा
स्पृष्ट्वा पुनः स्नात्वा दशैकादश वा पुनः। आंतत्त्व वाससां त्यागश्च
दाश्रवात्त वेत्तु सा। आरभ्य दीर्घतपसा नारीणां यो रजो भवेत्। न ते
न तत्त्वं तासामामनुः धेत मैकदाचन। प्रधानं यच्च तत्तयस्मान्न कुर्यान्नि
यमं कचित्। निषिद्धं यच्च पूर्वं स्यात्तत्सर्वं विनिवर्त्तते। एष धर्मो द्वा
नारीणां ज्ञेयो मूत्रपुरीषवत्। आतार्थं न प्रदुष्येत रजसा तपसि
स्थिताः। इति। अथ चतुर्विंशतिमतानुराजसा शुध्यते नारी परपुंस्प

निगामिनी। तथाऽपि मुनिभिः प्रोक्तं प्रायश्चित्तं समाचरेत्। तद
र्द्धं ब्राह्मणीगर्भात् क्षत्रियादिप्रस्य गमने सति। क्षत्रियस्य चरेत्
कृच्छ्रं वैश्यः सांतपनं स्मृतं। शूद्रस्य गमने चैव पाराकेन समाचरे
त्। अर्द्धं चान्येषु सर्वेषु पापेषु क्रं मनीषिभिः। विप्रगर्भे च पाराकं
क्षत्रियस्य तथैव च। वैश्ये विप्रास्तथैव च कर्त्तव्यं पाराकेन समन्वितं।
शूद्रगर्भे तु वैश्यागम्य च चांडालदूषितानां। गर्भपाते तु तद्वत्तुः
प्रायश्चित्तं विशुद्धये। गर्भपाते विंसमुद्दिष्टं यथा वर्णवधः स्मृतः।
जातगर्भे विशेषः स्याद्धर्मोक्तो मुनिभिः पुरा। ब्रह्मगर्भवधे त्वर्द्धं
कृच्छ्रं सांतपनादिकं। क्षत्रगर्भवधे चैव चरेच्चान्द्रायणव्रतं। वैश्य
स्य चैवं द्वं प्रोक्तं पाराकं शूद्रघातने। प्रायश्चित्तमिदं प्रोक्तं गर्भपा ५५

तविशेषतः। स्त्रीणां नास्ति परित्यागो ब्रह्महत्यादिभिर्विना। तत्रा
पि रुद्धमध्ये तु प्रायश्चित्तानि कारयेत्। परित्यक्ता चरेत् पापं बक
ल्पं यदि किंचन। न तु पापं शतध्नरूपा बांधवान्सगच्छति। यावंति
नारीरोमाणि तत्प्रसूतिकुलेषु च। तावद्वर्षसहस्राणि परित्या
गी विपच्यते। कुंभीपाके महाघोरे तद्दोषाज्जायते पिशाचो वसति स्त्री
परित्यागात् यावदाहूतसंप्लवं। पितृमातृगुरुत्यागी नार्यत्या
गी सुहृत्त्यजेत्। असिपत्रवनं गत्वा शतं चांडालयोनिगः। माता
पिता गुरुत्यागी पितृव्यो मातुलस्तथा। उपाध्यायस्तथाचार्य
ऋत्विग्विद्वांस्तथैव च। आश्रमी च तपस्वी च इत्येतद्गुरवः स्मृताः।
महापातकिनां पातदेष्ठ पुरा स्वमनुरब्रवीत् मत्तु रादपियं द

ह्यावुष्टांसारिवद्दूषितां। रक्षणीयास्त्रियोप्येवं न त्वेत्यागशी
लवान्नां संवर्त्तेन यथा नार्यां दृष्ट्वा म्लेच्छसेवितां। संशोध्य संग दे२
हीनासा अन्यैरेवमपि स्त्रियः। चतस्र एव संत्याज्या शोधये
स्त्र्यपि स्त्रियः। श्वपाकोपगतायाञ्च भर्तृघ्नी पितृपुत्रगा। निर्वा
स्यावव्यभिचारिण्य प्रतिकूला तथैव च। निवासिनं यथा नासां त
थाह्नस्तु द्विजोत्तमाः। मलिनां मुंडशिरसीं पिंडमात्रोपजीविनीं।
व्यवहारपरित्यक्तां वासयेद्व्यभिचारिणीं। पृथक् शय्यासनाहा
रां गृहमध्ये निवासिनीं। पृथक्कृताव नियुक्ता च प्रतिकूलां च वा
सयेत्। स्मृतिवेदविरोधेन परित्यागो यथा भवेत्। तथैव लौकिकं ५८
वाक्यं स्मृतिबाधपरिग्रहेतु। अर्थांगिराः। ब्रह्मचारी शुना दष्ट

स्त्र्यहं सायं यवां पिबेत्। गृहस्थस्य त्रिरात्रं वै एकाहमग्निहोत्रवा
न्नानाल्पकृच्छ्रं तु दष्टस्य तादृवद्भिर्यणेर्भवेत्। स्यात्पादवद्व्रियर्णबाक्यो
द्धवंन्यैव वस्तुगुणो महान्। श्वशृगालखरैर्दष्टो ग्राम्यैः क्रव्यादि
रथवा नरश्चोष्ट्रवराहैश्च प्राणायामं समाचरेत्। ब्राह्मणी च शु
ना दष्टा जंबुकेन वृकेन वा। उदितं यदि नक्षत्रं दृष्ट्वा सद्यो विशुध्य
ति। श्वशृगालवृकाद्यैस्तु दष्टश्चेद्ब्राह्मणो भवेत्। स्नात्वा जपेत्स गाय
त्रीं पवित्रां वेदमातरं। ब्राह्मणस्तु शुना दष्टो ग्रामस्नानविवर्जितो
ऽपि प्रदक्षिणीकृत्य सद्य एव विशुध्यति। ब्राह्मणस्तु शुना दष्टः स व्र
ती स्नानमाचरेत्। तु सहृतं यावकं वा च को अहोरात्रेण शुध्यति। वेद
विधाज्जलस्नानं शुना दष्टो द्विजोत्तमः। दृष्ट्वाग्निं हूयमानं स सद्य ए

वविशुध्यति। गवां शृंगोदकस्नातो महानद्योस्तु संगमे। समुद्रदर्श
नाद्वापि श्वना दष्टः शुचिर्भवेत्॥ श्वशृगालनकुलमार्जारमूषक
प्लवगपुरुषदष्टानां स्नानमापादिष्टीयात्तिः प्राणायामत्रयं चा
पराशरः। ब्राह्मणस्य व्रणद्वारे पूयशोणितसंकुले। कृमिरुत्पद्य
ते यत्र प्रायश्चित्तं कथं भवेत्॥ तत्र गोमूत्रं गोमयं क्षीरं दधिसर्पिः
कुशोदकं त्र्यहं स्नात्वा च पीत्वा च कृमिदष्टः शुचिर्भवेत्॥ अज्ञा
तस्तु चंडालो निवसेद्यस्य वेश्मनि। विज्ञाने चोपसन्नस्य द्विजाः कु
र्युरनुग्रहं। क्षीरेण दधिसर्पिभ्यां तप्तकृच्छ्रं कयासमाहिता। कुंडीत
सह विप्रैस्तु त्रिसंध्यमवगाहनं। त्र्यहं क्षमस्वकं जीतप्रक्षिपेन्नद
नं तरां छिवाग्राशपवृतं क्षीरं गोमूत्रं गोमयं दधि। त्रयाणामपि ५७

स्त्रीणां संकरसंप्रवृत्तितो दशसाहस्रमभ्यस्य गायत्री तिविशो
धनं। आकरवेत्रवेणुद्विरूप्ययोः कांस्यताम्रयोः। जलशौचं वस्त्राणां
पुनःपाकेन मृन्मयं। कुसुंभतिललवणगुडकर्पाससर्पिषां। क्षारे
लयात्वधान्यानि दद्याद्वेश्मनि पावकं। कांडूतारा कालासंस्थेषु
वर्णसलिलेन वा। विप्राणां ब्रह्मघोषेण शूतं नोडपंचयकृवेत्। शूद्रस्य
यत्कृतं धारितं सर्वं प्रोक्षणात्तस्य विः। अपूर्णं हृताते जानां स घःशो X
धनमुत्तमी। सघृतसद्वैर्यैस्तु कयाद्ब्राह्मणभोजनं। गाविंशतिद
धीकं दद्याद्विप्रेषु दक्षिणां। एवं वसिष्ठः॥ चंडालानिवसेद्घरस्य
हे अज्ञात एव वा तस्मात् चेच्छुद्धेच्छुकोः प्राजापत्यं समाचरेत्। अकाम
तः सप्तवेतु कोऽभ्यदेवद्विजोत्तमः। कामात् पाराकतः शुद्धिमदा
सांतपनेन वा चांद्रायणपराकवा। द्विजातीनां विशोधनं प्राजापत्यमेव

शूद्राणांशेषंतदर्द्धसारतः॥उच्छिष्टस्तुयदिस्पृष्टस्तत्रस्नानंस
माचरेत्॥उपोष्यचनिशामेकांपंचगव्येनशुध्यति॥संवर्त्तः॥चं
डालसंकरेशुद्धेकाश्वपाकपुक्कसेष्वपि॥गोमूत्रयावकाहारोमासा
र्द्धेनविशुध्यति॥तेनप्रसाधितान्नेनैतदुक्तंचैवद्विजातिनां॥कायस्प
शंखिसंस्पृश्यसमासन्नैयमाचरेत्॥स्त्रीणामर्द्धव्रतंतत्रवृद्धबाला
तुरेषुच॥इतरेषांतुकृत्यानांतदर्द्धमितिस्मृतिः॥ततःस्पृष्टाय
छिन्नंकेनअस्नाद्याविधिवज्जलेविवितालोऽनेनकुःपातनःपाद
एववा॥पराशरः॥अशीतिर्यस्यवर्षाणिबालोवाप्यूनषोडशः॥
प्रायश्चित्तार्द्धमर्हंतिस्त्रियोरोगिणएववा॥ऊनैकादशवर्षस्प
स्यपंचवर्षात्तुपरस्यचाचरेद्गुरुःसुहृद्वापिप्रायश्चित्तंविशोधनं॥ ५८

चरेद्गुरुःसुहृद्वापिप्रायश्चित्तंविशोधनं॥अनुपनीतस्यदोषस्याक्रि
यमाणेविगर्हितः॥अप्राप्तव्यवहारस्यवत्सरात्षोडशादिहा॥दु
र्बलान्वयदःप्रोक्तस्तथाचबालवृद्धयोः॥अतोऽन्यथाभवेद्दोषोऽद्य
यद्दंडंकुर्वीतामृषास्नेहाद्वायदिवालोभात्तथादज्ञानतोपिवा
कुर्वंतिह्युयदंयेतुतत्पापंतत्रगच्छति॥यस्तुस्पष्टाद्दोऽकुर्वंतिकारु
व ण्पाद्यैर्यंस्ययदोत्तधर्मविघ्नकर्तारिपतंतिनिरकेध्रुवं॥शरीरस्यात्य
यकार्येस्यएवनियमोद्विजः॥महाकार्यविरोधेऽपिनवस्तुस्यकदा
चन॥इति॥छ॥अथगोवधप्रायश्चित्तं॥छ॥तत्रमनुः॥उपपातकसं
युक्तोगोघ्नोमासंयवान्पिबेत्॥कृतवापोवसेद्गोष्ठेचर्मणातेनसंवृतः॥
चतुर्थकालमश्नीयात्क्षारलवणंमितं॥गोमूत्रेणाचरेत्स्नानंद्वौ

मासो नियतेंद्रियः॥ दिवा गच्छेत्ततो गास्तु तिष्ठन्नूर्ध्वं रजः पिबन्॥
शुश्रूषित्वा नमस्कृत्वा रात्रौ वीरासनं विशेत्॥ तिष्ठंतीषु च तिष्ठे
त व्रजंतीष्वप्यनुव्रजेत्॥ आसीनासु तथासीत नियतो वीतमत्स
रः॥ आतुरामभिशस्तां वा चौरव्याघ्रादिभिर्भयैः॥ पतितां पंकम
ग्नां वा सर्वप्राणैर्विमोचयेत्॥ उष्णे वर्षति शीते वा मारुते वाति वा
यति वा भृशं॥ न कुर्वीतात्मनस्त्राणं गोरकृत्वा तु शक्तितः॥ आत्मनो य
दि वान्येषां गृहे क्षेत्रे थ वा खले॥ भक्षयंतीं न कथयेत् पिबंतीं
चैव वत्सकं॥ अनेन विधिना यस्तु गोघ्नो गामनुगच्छति॥ स गोहत्या
कृतं पापं त्रिभिर्मासैर्व्यपोहति॥ वृषभैकादशा गाश्च दद्यात्सुचरित
व्रतः॥ अविद्यमाने सर्वस्वं वेदविद्भ्यो निवेदयेत्॥ यमः॥ गोमतीवाऽ ५९

पिद्विधां॥ ॐकारं वेदमेव च॥ गायत्र्या दशसाहस्रं ऊर्ध्वतास्यकमेव च
अथ गोमती विद्या॥ गावः सुरभयो नित्यं गावो गुग्गुलगंधिकाः॥ गावः प्र
तिष्ठा भूतानां गावः स्वस्त्ययनं महत्॥ अन्नमेव परं गावो देवानां हवि
रुत्तमं पावनं सर्वतीर्थानां रक्षंति च वहंति च॥ हविषा मंत्रपूतेन तर्पयं
त्यमरान् दिवि॥ ऋषीणामग्निहोत्रेषु गावो होमे प्रयोजिकाः॥ सर्वेषामेव
भूतानां गावः शरणमुत्तमं॥ गावः पवित्रं परमं गावो मंगलमुत्तमं॥ गावः
स्वर्गस्य सोपानं गावो धन्याः सनातनाः॥ नमो गोभ्यः श्रीमतीभ्यः सौ
रभेयीभ्य एव च॥ नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः॥ ब्राह्मणाश्चै
व गावश्च कुलमेकं द्विधा कृतं॥ एकत्र मंत्रास्तिष्ठंति हविरन्यत्र तिष्ठति॥
वृषभैकादश गाश्च दद्यात्सुचरितव्रतः॥ अविद्यमाने सर्वस्वं ब्राह्मणे
भ्यो निवेदयेत्॥ गावः सर्वस्य लोकस्य नमस्कार्या तथा॥ नमो नमः॥ तस्माज्जा

वानदंतव्याऽइत्याह भगवान्यमः॥ शातातपः॥ पंचगव्येन गोघाती
मासेनैकेन शुध्यति॥ गोमतीं च जपन्नित्यं गवां गोष्ठे च संविशेत्॥
पराशरः॥ गवां बंधनयोक्त्रेषु भवेन्मृत्युरकामतः॥ अकामतः कृतं
घातं ब्राह्मणेभ्यो निवेदयेत्॥ वेदवेदांगविद्विप्रो धर्मशास्त्रं ब्रुवंस्त
तः॥ अकामकृतपापस्य प्रायश्चित्तं विनिर्दिशेत्॥ धुर्येषु वहमाने
दंडेनाभिहतेषु चौ॥ काष्ठेन लोष्ठेन वा लोष्टुना वाथ ताडिताः॥
हलिताः पतिताः पंथेव मृता वाचा कूप एव वा॥ एवं गवां च धुर्याणां प्र
वक्ष्यामि यथाविधिः॥ अंकितस्य पदं गच्छेत् पंचसप्तदशापि वा॥
ग्रासं वा यदि दद्यात्ति तीर्थं पिबति वा पयः॥ वृद्धव्याधिविनष्टानां प्राय
श्चित्तं न विद्यते॥ निरोधने चरेत्पादं बंधने चार्द्धमेव च॥ योजने पाददीनं ६०
×स्यात्त्राणोपयंत्रघातने॥

ता
शीतानलदत्ता चैव तद्वंधनमृथा॥ पिबाश्वन्यागाराद्यपेक्षायां प्राय
पद्यं विनिर्दिशेत्॥ अपालनात्मरणस्य त्रुगोश्चरंती कथं च नो प्राजापत्यं
चरेत् कृच्छ्रं गोघ्नाभीज्ञतमुत्तमं॥ सशिखं वपनं कार्यं त्रिसंध्यमवगाहनं॥
श्टंगोषु॥ परिवुरेमु केलानां यूलश्रवणादिभिः॥ श्राद्धमेवहितं चर्म परिधाय
सगाश्ववेत्॥ तासां मध्ये वसेद्रात्रौ दिवा ताभिः सममूवजेत्॥ ब्राह्मणस्य विशे
षेण तथा राजन्यवैश्ययोः॥ प्रायश्चित्तेन तत्रैव एकेयर्थाब्राह्मणतोऽ
न्नोत्रमुक्ताहितां गां च दद्याद्विप्राय दक्षिणां॥ अंगिराः॥ अंगुष्ठमात्र
स्थोल्पेन वार्द्रमात्रप्रमाणतः॥ सार्द्धश्चैव तु पालाशो दंड इत्यभिधी
यते॥ तस्मादूर्ध्वप्रमाणेन यदि गां प्रतिपादयेत्॥ द्विगुणं तु चरेत् तत्र
प्रायश्चित्तमिति स्थितिः॥ संवर्त्तः॥ यंत्रणे गोचिकित्सार्थे मूढगर्भविमो
गो

वनौपन्नेहृतेविपत्तिःस्यात्प्रायश्चित्तंनविद्यते॥अपथ्यंस्नेह
मादारंदघाजौब्राह्मणेस्वयं॥प्राणिनांप्राणहथ्यर्थंप्रायश्चित्तंन
विद्यते॥अथअविक्रेयप्रायश्चित्तं॥नन्दहारीनः॥गुडतिलपुष्पफ
लमूलपक्वान्नअश्मशस्त्रजकमांसस्नायुक्षवंनरवशृंगकिवि
क्रयेसगुणजं॥हिंगुगुलसर्जरसहरितालमनःशिलांजनगैरिक
क्षारलवणमणिमौक्तिकप्रवालवेणवेणुमृन्मयेषुच॥आराम
तडागोदकपानपुष्करिणीइत्यादिकृतविक्रयेषुचाविषवणस्नायी
अधःशायीचतुर्थकालवकुत्रिमहस्तंजपन्संवत्सरेणपूतोनव
ति॥मनुः॥सद्यःपततिमांसेनलाक्षयालवणेनच॥त्र्यहेणशूद्रो
भवतिब्राह्मणःक्षीरविक्रयात्॥अथवर्णसंकरेषुप्रायश्चित्ता ६१
नि॥

हारीतः॥आगारस्नेहदोषेषुज्ञातातांडारसंकरो॥विवाहादौ
र्द्धमासेनब्राह्मणःशुद्धिमाप्नुयात्॥वर्णसंकरस्त्रीशूद्राणांचशिष्ट
छ्रिणी॥विदं॥अयाज्यायाजनेदोषविप्रसुगणेनाविस्पृश्यति॥वृद्धस्मृ
तिः॥अकामतस्त्वापद्विवायदिज्ञायतशंकरः॥तदाकार्यमिलेवो
मोगार्पण्यावपनंतथा॥शातातपः॥उच्छिष्टोच्छिष्टसंस्पृष्टःशुना
शूद्रेणवाद्विजः॥उपोष्यरजनीमेकांपंचगव्येनशुध्यति॥कागले
यः॥अज्ञानस्पर्शेतुविप्रस्यसर्वस्मिन्वानियदि॥यच्चकालेनसंस्पृशि
त्वाप्रायेणायामेनशुध्यति॥अज्ञानतस्तुकोऽन्नंपंचगव्येनशु
ध्यति॥सूद्रेणसहचैवचार्वाचद्विजःश्रीप्राजापत्यंचरेत्॥वासिकमीनिष्ठु
हैत्यप्रच्छर्दनविरेचनैः॥शिष्टस्त्रीणस्पृश्येततस्मात्पापान्नसंशो
यः॥

वृद्धशातातपः। यदा भोजनकाले तु अशुचिर्भवति द्विजः। भूमौ नि
क्षिप्य तं ग्रासं स्नात्वा विप्रो विशुध्यति। अशनान्ततः पिबन्तोयं ब्रा(ह्म)
णोऽर्धं यस्त्वनातिष्ठ। अहोरात्रोषित स्नात्वा पंचगव्येन शुध्यति। चं
डालैः श्वपाकैः स्पृष्टो विण्मूत्रे तु सतो द्विजः। त्रिरात्रं तत्र कुर्वीत
भुक्तोच्छिष्टः षडाचरेत्। येन केनचिदप्यक्तः अंडजं स्पृशात यदि।
अहोरात्रोषितः स्नात्वा पंचगव्येन शुध्यति॥ ॥ इति सद्धिरचित
सारयाद्के कर्म्मविपाके प्रायश्चित्ताऽधिकारोऽनवद्यः॥ ॥ यदाये
ह्रींशार्धं यमिदमत्रातिष्ठन्नासिचश्रीः। तदास्यो निष्क्रान्तः कल्पिरग
मद्य यमुवरिपूनुः ततोऽस्मिन्सुन्नागेहतमवितरं त्रणपनिर्वृतं।
स्थितिं धर्मे श्रीमत्ऽनसुरवदंगविनिता॥ १ अथो अनुक निष्कृ ६२

तीनां तु पापानामपनुत्तये। शक्तिं चावेक्ष्य पापं च प्रायश्चित्तं प्रक
ल्पयेत्। यैरन्यकपायैरनांसि मानवोऽपकर्षति। नानन्यकपायाद्य
स्यामि दर्वाधिपिष्टसेवनात्। अज्ञातं यदि वाऽज्ञातं पापं कृच्छ्रेण शोधये
त्प्रयतः। रसायनादिमंत्राश्च तथैवौषधसिद्धयः। तस्य सर्वाणि सिध्यंति ×
यो नरः कृच्छ्रकृद्भवेत्। वैदिकानि च सर्वाणि शास्त्रतायानि कानि चौ सिध्यं
ति सर्वदानानि कृच्छ्रकर्त्तुर्न संशयः। तडसातस्पर्शयोगा महांश्चैवोऽप
जायते। वांछितान् संततार्थांश्च संप्राप्नोति न संशयः। इज्यावान् भवति दे
वेषु तथा ऋषिगणेषु च। विपाप्मा वितमस्कश्च रसशुद्धः स्याद्विशेष
तः। कृच्छ्रं याज्ञवल्क्यः। कृच्छ्रकृत् धर्मकामस्तु महतीं श्रियमाप्नुयात्। सूप
गुरुकत्तुफलं प्राप्नोति समाहितः। मार्कंडेः॥ कृच्छ्राण्येतानि कार्याणि

सदावर्षत्रयेणवा॥ नकृच्छ्रेषे तु शूद्रस्य नाधिकारो विधीयते॥ आदौ
तु मुंडनं कार्यं सर्वकृच्छ्रे सर्वदा॥ कुर्यान्नितर्पयेद्विप्रान् पित्र्यायाः संप्र
कल्पयेत्तान् ततः शेषविधानेन कृच्छ्रविशुद्धीतवा यतः॥ कृच्छ्राणामेषसर्वे
षां विधिरुक्तोऽनुपूर्वशः॥ प्राजापत्यस्य कृच्छ्रस्य तथा सांतपनस्य च॥
अथ प्रतानि॥ तत्र मनुः॥ त्र्यहं प्रातस्त्र्यहं सायं त्र्यहमद्यादयाचितं॥
त्र्यहं परं तु नाश्नीयात्प्राजापत्यं चरन्द्विजः॥१ गोमूत्रं गोमयं क्षीर
दधि सर्पिः कुशोदकं एकरात्रोपवासश्च कृच्छ्रं सांतपनं स्मृतं॥२
चतुर्विंशतिरात्रं तु नियतात्मा जितेंद्रियः॥ कृच्छ्रातिकृच्छ्रं कुर्वीत
अनेन विधिना द्विजः॥३ एकैकं ग्रासमश्नीयात्त्र्यहाणि त्रीणि पूर्व
वत्त्र्यहं चोपवसेदंत्यमतिकृच्छ्रं चरन्द्विजः॥४ तप्तकृच्छ्रं चरन् ६२

ति। म
तप्तकृच्छ्रं चरन्विप्रो घृतक्षीरजलानिलान्॥ प्रतित्र्यहं पिबेदुष्णा
न्सकृत्स्नायी समाहितः॥५ यतात्मनोऽप्रमत्तस्य द्वादशाहमभो
जनं॥ पराको नाम कृच्छ्रोऽयं सर्वपापापनोदनः॥ याज्ञवल्क्यः॥ प
र्णोदुंबरराजीवबिल्वपत्रकुशोदकैः॥ प्रत्येकं प्रत्यहाभ्यस्तैः पर्णकृ
च्छ्रः प्रकीर्तितः॥७ एतान्येव समस्तानि त्रिरात्रोपोषितः शुचिः॥ क्वाथयि
त्वा पिबेदद्भिः पर्णकृच्छ्रोऽभिधीयते॥८ एकभक्तेन नक्तेन तथैवायाचि
तेन च॥ उपवासेन चैकेन पादकृच्छ्र उदाहृतः॥९ पिण्याकाचामतक्रां
बुसक्तूनां प्रतिवासरं॥ एकैकमुपवासश्च सौम्यकृच्छ्रः प्रकीर्तितः॥
१० एषां त्रिरात्रमभ्यासादेकैकस्य यथाक्रमं॥ तुलापुरुष इत्येष ज्ञे
यः पंचदशाहिकः॥११ मार्कंडेयः॥ सक्तवोंऽबुयुता मासं बृहत्कृच्छ्रः प्रकी

द्विंतः॥१२ त्र्यंबुसिद्धस्तथा मासके वालेवरुणो भवेत्॥१३ फलैर्मा
सेन कथितः फलकृच्छ्रो मनीषिभिः॥१४ श्रीकृच्छ्रः श्रीफलैः प्रोक्तः
पद्माक्षैरपरस्तथा॥१५ मासेनामलकैरेवं श्रीकृच्छ्रः पारकीर्ति
तः॥१६ पत्रैर्मतः पत्रकृच्छ्रः॥१७ पुष्पैस्तत्कृच्छ्र उच्यते॥१८ मूलकृ
च्छ्रस्तथा मूलैः॥१९ फलकृच्छ्रः फलैः स्मृतः॥२० शाकैर्मासं तु क
थितः स्वनामा निर्विचक्षणैः॥२१ सायंप्रातस्तु भुंजानः पिबन्नपि
नांतरा। षड्भिर्वर्षैरयं प्रोक्तः कृच्छ्रो नित्योपवासिनां॥२२ एकभक्ते
न मासेन कथितं चैकभाक्तिकं॥२३ नक्तकृच्छ्रं तु नक्तेन॥२४ महत्संव
त्सराद्भवेत्॥२५ नक्ताशिना धर्मरुचेरेकभक्तस्य वा पुनः। त्र्यहं क
प्रवसेत्कृच्छ्रे स्नायीत सवनत्रयं॥२६ निमग्नश्च तथैवाप्सु त्रिःपठेद ६५

घमर्षणं॥२७ आमक्रिया तु द्वौ मासौ पक्वं च पयसा तथा। अष्टरा
त्रं तथा दध्ना त्रिरात्रमपि सर्पिषा। निराहारस्त्रिरात्रं च कुर्यादुद्दाल
कव्रतं॥२८ सर्वपापप्रशमनं सर्वकामप्रदं तथा। वायव्यकृच्छ्रमुक्तं तु
पाणिपूरान्नभोजनात्॥ मासेन वर्धनं धर्मज्ञैः सर्वकल्मषनाशनं॥ ति
लपिष्टद्वादशरात्रेण कृच्छ्रं मासेयमुच्यते॥३० राजपुत्रातिमप्येकं कनक
न्यमश्चितं भुंजानस्य तथा मासं कृच्छ्रं धनददैवतं॥३१ गवां निर्हारनि
र्मुक्तैर्यवैर्मासं तु यः स्मृतः याम्यं कृच्छ्रं विनिर्दिष्टं मासेन स्मृतिपा
रगैः॥३२ सर्वकामप्रदं ह्येतत् सर्वकल्मषनाशनं। गोमूत्रेण चरेत्
स्नानं त्रिगंगोदकमाचरेत्॥३३ गवां मध्ये यदा तिष्ठेत् गोपुरीषं च से
विशेत्। गोग्रपीतास्तु न पिबेदुदकं व्रतमाचरेत्॥३४ अनुज्ञातस्तु सुतना

श्रीयाद्गुच्छितास्तच्छितोञ्वेधुं तथा चैवोपविष्टास्तु सर्वास्ते पवित्रा
न्नरः ॥ ३५ मासेनैकेन कथितं गोव्रतं कल्मषापहं ॥ वृद्धपराशरः ॥
उपवासमहोरात्रं ब्रह्मकूर्चं विनिर्दिशेत् ॥ पंचगव्यं च वासैन्त्याधिदि
तं दिव्यं चक्षुषा पापवत्रं तत्सुलोके भादवतां निरधिष्ठितं वरुण
श्रात्रगोमूत्रे गोमये हव्यवाहनः ॥ दधिर्वायुः समादिष्टः सोमः क्षीर
घृते रविः ॥ पयः कांचनवर्णायाः श्वेतायाश्चैव गोमयं ॥ गोमूत्रं ताम्रवर्णा
यानीलायाश्च तथा घृतं । दधि च कृष्णवर्णायाः इत्येतत्पंचगव्यकं ॥ गो
मूत्रं माषमानं स्याद्गोमयस्य तु षोडश ॥ क्षीरस्य द्वादश प्रोक्ता दध्न
स्तु दशकीर्तिताः ॥ गोमूत्रवत् घृतं प्रोक्तं तदर्धेन कुशोदकं ॥ पतद्
त्वपरीमाणं पवित्रं कायशोधनं ॥ गायत्र्याहृत्य गोमूत्रं गंधद्वारेति गो ६५

मयं ॥ आप्यायस्वेति च क्षीरं दधिक्राव्णेति च दधि ॥ तेजोसि शुक्रमित्या
ज्यं देवस्य त्वा कुशोदकं ॥ आपो हि ष्ठेति चालोड्य प्रणवेन ततः पिबेत् ॥
मध्यमेन पलाशस्य पद्मपत्रेण वा पिबेत् ॥ अथवा ताम्रपात्रेण ब्रह्म
पात्रेणैतानि वा ॥ यत्त्वगस्थिगतं पापं देहे तिष्ठति मानवे ॥ ब्रह्मकूर्चो
दहेत्सर्वं शुष्कमग्निरिवेंधनं ॥ हुकुशानातपः ॥ नदीतीरेषु गोष्ठेषु
देवायतनेषु च ॥ तत्र गत्वा तु चोदश्च ब्रह्मकूर्चं समाचरेत् ॥ अथातश्चां X
द्रायणकल्पः ॥ शुक्लचतुर्थ्यामुपवासः तु केशश्मश्रूण्यावाप्य दधिवाम
पाणिना ॥ वैशंपायनः ॥ ब्राह्मणः क्षत्रियो वैश्यो द्विजश्चरितव्रतः ॥ यदा
व्रतं कर्तुमनास्तस्य का प्रथमक्रिया ॥ वपनं सशिरस्कं च पंचगव्यं नरोत्थ
नं अनंतरं नदीस्नानं ततः कुर्वीत मेखलां ॥ सद्य दंडं विधिर्युचामोजी

मासेव्रतस्पश्चादंडं च दीचापालाशं न तस्मादेशयेद्व्रतं॥ अथा
नुक्रमः॥ हारीतः॥ आहारार्थं छिद्रे दद्यात्तापसे नियमाधिने ग्रास
शेषेणो कुर्कटांडप्रमाणं च ग्रासं कुर्यात्समाहितः॥ आर्द्रामलक
मात्रं च यावद्वा शिर्षांडसंमितं॥ अंगुलीयं थितं यावत्तु गायत्र्या च
भिमंत्रितं॥ प्राश्याथि चात्रपस्पृश्योत्पुनरेवाऽभिमंत्रयेत्॥ बोधाय
नः॥ प्राश्नाति प्राणाय चेति प्रथमं॥ अपानाय चेति द्वितीयं॥ व्याना
यचेति तृतीयं॥ उदानाय चेति चतुर्थं॥ समानाय चेति पंचमं॥ यदा
चत्वारो ग्रास्यां पूर्वं यदा त्रयो ग्रास्यां ग्रास्यां पूर्वं यदि द्वौ ग्रास्यां पाप
कोत्तरं एकं सर्वैरिति॥ यमः॥ नात्र विक्षेपयेत्पिंडं रसान्नस्वादये ६६
क्षुधः॥ न निंदा वा प्रशंसा वा स्वादुमचा वा स्वदयेत्॥ प्राङ्मुखो नियमस्थी
×या

घाक्यतोऽन्नमकृत्स्नयन्नु ग्रासहृद्धीयथा सोमो मासि पक्षे तथैव
चा वर्धयेद्ग्रासमेकैकं शुक्ले कृष्णे च ह्रासयेत्॥ एवं चांद्रायणं प्रोक्तं
यवमध्यं हि यैस्तुतं॥ १॥ एकैकं ह्रासयेत्कृष्णे पिंडं शुक्ले च वर्धयेत्॥ च
न्यत् पिपीलिकामध्यं शिवं चांद्रायणं स्मृतं॥ २॥ यथा कथंचित्पिंडानां
चत्वारिंशच्छतद्वयं॥ मासेनैवोपभुंजीत तद्धि चांद्रायणं चरन्॥
३॥ त्रींस्त्रीन्तपिंडान्समश्नीयान्नियतात्मा दृढव्रतः॥ हविष्यान्नैः
पृथकुमासं ऋषिचांद्रायणं चरन्॥ ४॥ अष्टावष्टौ समश्नीयात्पि
डान्मध्यंदिने रवौ॥ यतिचांद्रायणं ह्येतत्सर्वकिल्बिषनाशनं॥ ५॥ चतुरः
प्रातरश्नीयात् चतुरः सायमेव च॥ पिंडानेतद्व्रतं नाम ऋषिचांद्रायणं
स्मृतं॥ ६॥ एवं चांद्रायणं चीर्णे धेनुं दद्यात् पयस्विनीं॥ ब्राह्मणान्भोज

येभ्यस्त्यात्तेभ्यो दद्याच्च दक्षिणां॥७ यमः॥ आदित्या वसवो रुद्रा
मरुतोप्येवमब्रुवन्॥ सर्वकिल्विषनाशाय वरं चान्द्रायणं व्रतं॥
यत्किंचित्कुरुते पापं कर्मणा मनसा गिरा। तच्च चान्द्रायणं
कृत्वा तस्मात्पापात्प्रमुच्यते॥८ इति श्रीसारस्याद्देकर्मविपा
केप्रायश्चित्ताधिकारे चान्द्रायणविधिनिर्णयः॥ छ॥ मार्कंडः॥ गो
क्षीरं सप्तरात्रं तु पिबेत्स्तनचतुष्टयात्॥ स्तनत्रयात्सप्तरात्रं स
प्तरात्रं स्तनद्वयात्॥ स्तनं तथैव षड्रात्रं त्रिरात्रं वायुभुग्भवेत्॥
एतत्सोमायनं नाम व्रतं कल्मषनाशनं॥१ यमः॥ त्र्यहं पिबेत्तु गो
मूत्रं त्र्यहं वै गोमयं पिबेत्॥ त्र्यहं दधि परं यावकं च श्रीकृच्छ्रं तत्तद्व्य
ते॥२ त्र्यहं प्रातस्त्र्यहं सायं त्र्यहमद्यादयाचितं त्र्यहं च वायु ६७

भक्षः स्यात्कृच्छ्रं तद्विधीयते॥ अनुग्रहार्थं विप्राणां मनुर्ध
र्मभृतां वरः॥ बालवृद्धातुरेष्वेतत्प्रैश्च कृच्छ्रमाह प्रजापतिः॥ गोमूत्रं
गोमयं चैव क्षीरं च दधि सर्पिषा॥ अहोरात्रोषितात्र चापकनो
डन युत्तमं॥ ब्रह्मकूर्चमिदं पीत्वा पूतात्मा वर्तमानकः पपक्षमेव उ
पया॥ निषकैकं तच्च पदं चर्द॥ इति सांतपनं नाम श्वपाकमप्यपिशो
धयेत्॥ त्र्यहं पिबेत्तु गोमूत्रं त्र्यहं वै गोमयं पिबेत्॥ त्र्यहं दधि त्र्य
हं क्षीरं त्र्यहं सर्पिस्ततः शुचिः॥७ अजासांतपनं नाम सर्वपापप्र
णाशनं॥ अथांगिराः॥ कपिलाल्पसैववन्स्यायाः पयः सोल्लं च यः पिबे
त्॥ एष व्यासकृतः कृच्छ्रः श्वपाकमपि शोधयेत्॥८ अथ चद्दारिणीक
त्तं दिवसं मारुताशनो रात्रौ जलस्थितो व्रतः प्राजापत्येन तत्स
मं॥९

गौतमः।। दविष्पान्नः प्रातरश्नीयात्तत्तु कांतिस्तो रात्रीनाश्नीया
दथापरः।। अहन्नत्तुंडतोथापरः।। अदंनकंचनयाचेतोथापरः।
अदंत्तपदेसतु।। तिष्ठेदहनिरात्रावासीत तत्र तास्त्री कामःसत्यंवद
तु।। अनार्यैर्नसंभाषेत रौरवयौधाजयेन्नित्यं प्रयुंजीत।। अत्रस
वनमुदकोऽपस्पर्शनं।। आपोहिष्ठेति तिसृभिः पवित्रवतीभिर्मा
र्जयेत्।। हिरण्यवर्णाः शुचयःइत्यष्टाभिः।। अथोदकतर्पणं।।छ।।
प्रतिनामप्रणवाद्यंनमोंतं।। नमो हमाय नमो हमाय ध्रुवतता
पसाय। पुनर्वसाय। नमः मौंज्याय। पथिवसुंविंदाय। सर्वविंदा
य। पाराय। सुपाराय। पारदिष्णवे नमः। रुद्राय पशुपतये मह ६८
तेदेवाय। सूर्याय। आदित्याय। नीलकंठाय। कृत्ताय। पिंगलाय नमः।

उपेक्षाय। अत्युग्राय। वृद्धाय। ऐंद्राय। हरिकेशाय। ऊर्ध्वरेतसेनमः। स
त्याय। पावकाय। पावकवर्णाय। कामाय। कामरूपिणेनमः। दीप्ता
य। दीप्तरूपिणे। सत्यपुरुषाय। महापुरुषाय। मध्यमपुरुषाय।
त्तमपुरुषाय। ब्रह्मचारिणेनमः। चंद्रललाटाय। कृत्तिवाससेनमः।
इति एतद्देवादित्यास्थापनं।। एतेनैवाऽपाकृतयः।। द्वादशरात्रं
त चरुंश्रपयित्वादेवताभ्योजुहुयात्।। तद्यथा। अग्नयेस्वाहा। सोमाय
स्वाहा। अग्नीषोमाभ्यां। इंद्राय। विश्वेभ्यो देवेभ्यो। ब्रह्मणे। ब्राह्म
८ न्यो णेनमः। प्रजापतये। अग्नये स्विष्टकृते। इति। ततो ब्राह्मणभोजनं
एतेनैवाऽस्तिलच्छिद्रो व्याख्यातः।। यावदन्नाद्यादादीत तावदश्नीया
त्।। अंत्यसंस्कृतीयां तु छत्रानिकृंत्त प्रथमं चरित्वा ... इतो कर्म

पूतो भवति॥ द्वितीयं च रिचा यदन्यन्मद्यपापेभ्यः प्राप्तं कुरुते तस्मा
न्मुच्यते॥ तृतीयं च रिचा सर्वस्मादेनसो मुच्यते। एतांस्त्रीनृचा
ति चतुर्थं च रिचा सर्ववेदेषु स्नातो भवति। सर्वा देवज्ञातो भव
ति यश्चैवं वेद॥ इदमाह मार्कंडः॥ उपोषितः शुद्धः पक्षे पंचदश्या
मनंतरां पंचगव्यं समश्नीयात् तद्विप्रान्नमनंतरं ब्रह्मकूर्चमि
दं कुर्याद्द्वादश्यां द्विजोत्तमः नायाचे। पक्षांते च अथवा कार्यं मासांते वाथ
वा पुनः। मासे मासे नरः कृत्वा ब्रह्मकूर्चं समाहितः। सर्वपापविनि
र्मुक्तो यथेष्टां गतिमाप्नुयात्॥ तत्र पंचगव्यार्थं कार्याः तासु वर्णा
ज्ञानीलाश्वलात् तथाक्रमात्॥ गोमूत्रं गोमयं क्षीरं दध्यस्पृगो स
माहरेत्॥ अथैतानि समस्तानि कापिलायाः समाहरेत्॥ गायत्र्या ६९

दाय गोमूत्रं गंधद्वारेति गोमयं आप्यायस्वेति च क्षीरं दधिक्राव्णो
ष्णेति वै दधि। तेजोसि शुक्रमित्याज्यं देवस्य त्वा कुशोदकं। अघमर्ष
णसूक्तेन संयोज्यं प्रणवेन वा। सौवर्णराजतताम्रपालाशे पात्र
एव वा॥ इदं शातातपः॥ गोमूत्रं सपादकमुष्णं गोशकृत् त्रिगुणं
स्मृतं। क्षीरमष्टगुणं दद्याद्दधि दद्याच्चतुर्गुणं। सर्पिस्तु त्रिगुणं दद्या
त् पंचगव्ये विधिः स्मृतः। नवपत्राः छिन्ना दर्भा अच्छिन्नाग्राः दीर्घकाः।
ततः सप्त हुत्वा देवतायाः यथाक्रमं। अग्नये चैव सोमाय स्वा
नुके हेदं विलाविल्वचा। विलोमं तु केति सावित्र्या मानस्तोके प्रजापतेः
देवतानामिदं कचाकृत चोषस्पृश्यं पिबेत्तु। आलोड्य प्रणवेना
वपिवेच्च प्रणवेन तु। ब्रह्मकूर्चमिदं लघु मासि मासि चरन्नुविनः।

सर्वपापविशुद्धो वै जायते नात्र संशयः॥ एकस्यादिगतं पाप
यद्दद्याति दहिनां॥ ब्रह्मकूर्चं दिदत्सर्वं प्रदीनाग्निरिवेंध
नं॥ एकादश्यां तु पाषण्डादश्यां भगवंतं श्रीवासुदेवं धूपपु
ष्पगंधान्नलेपानैः दीपानैवेद्यार्घविधि ब्राह्मणतर्पणैश्च व्रत
मेवं संवत्सरं कृत्वा पापेभ्यः प्रतामवति॥ यावज्जीवं कृत्वा चाचैतन्नी
यमवाप्नोति॥ कृष्णपक्षे द्वादशी चेपपं चवत्सरं कृत्वा चाक्षयं लो
कमवाप्नोति॥ यावज्जीवं चा विष्णुलोकमिति॥ एवमेवं पंचदशी यदि॥
अमावास्यां पूर्णमास्यां तथैव च॥ ब्रह्मव्रतं परश्चिरन्क
श्वं महदाप्नुयान्॥ ह्यपातसाविता यस्यां दिविचं द्र हृदस्पती॥
पूर्णमास्यां तु महती प्रोक्ता संवत्सरणसा नस्यां दानोपवासादि ९०

मच्चर्यं परिकीर्तितं॥ तथैव द्वादशी शुक्लायां यस्यां तु श्रवणर्क्षयुता X
यमः॥ देवाष्टम्यां तु मासस्य चतुर्दश्यां तथैव च॥ अमावास्यां पूर्णिमा
सीष्टमी द्वादशी द्वयं॥ संवत्सरमभुंजानः सततं तु यतेंद्रियः मुच्य
ते सर्वपापेभ्यः स्वर्गलोकं स गच्छति॥ ब्रह्मचर्यफलं यच्च यत्फलं क
तुयाज्ञिनां॥ सर्वकामफलं यच्च तत्सदाप्नोत्यसंशयं॥ देवलः॥ ब्रह्म
चर्योऽपवासो च सत्यमामिषवर्जनं॥ पापघ्नया यच्चचारिदारिद्र्या
नी॥ तिनिश्चयः॥ स्त्रीणां संप्रेक्षणात्पार्श्वन्नाति संकथनादिनि॥ धै
र्यं निश्चयवतेयस्य ब्रह्मचारिः सिद्धिमान्॥ उपवासो विनश्येत दिवा
स्वापाद्ग्राममैथुनात्॥ अत्यर्थं जलपानाद्वा उपवासः प्रणश्यति॥ मनु॥
पातकिज्ञातृयः शोधमवाप्तराविः शतनसः॥ अनाविःकृतपापांश

मंत्रैर्होमैश्च शोधयेत्॥ ख्यापनेनानुतापेन तपसाध्ययनेन वा पा
पं विशुद्धिमायाति तथा दानेन वापदि॥ ऽपाध्मयं हि संतप्य तस्मात्
पापात्प्रमुच्यते॥ नैवं कुर्यां पुनरिति निवृत्त्या पूयते तु सः॥ यद्दुस्तरं
दुरापं च यद्दुर्गं यच्च दुष्करं॥ सर्वं तत्तपसा साध्यं तपो हि दुरतिक्रमं॥
इत्येतदेनसोऽस्य प्रायश्चित्तं यथाविधि॥ अत ऊर्ध्वं रहस्यानां प्रा
यश्चित्तं निबोधत॥ सव्याहृतिप्रणवकाः प्राणायामास्तु षोडश॥ अ
पि भ्रूणहनं मासात्पुनंत्यहरहः कृताः॥ सकृज्जप्त्वास्य वामीयं शि
वसंकल्पमेव च॥ अपहृत्य सुवर्णं तु क्षणाद्भवति निर्मलः॥ हवि
ष्पांतीयमभ्यस्य न तमंह इतीति च॥ जपित्वा पौरुषं सूक्तं मुच्यते गु
रुतल्पगः॥ एनसां स्थूलसूक्ष्माणां चिकीर्षन्नपनोदनं॥ अवेत्यृ

चं जपेदब्दं यत्किंचेदमितीति वा॥ प्रतिगृह्याप्रतिग्राह्यं भुक्त्वा
चान्नं विगर्हितं॥ जपंस्तरत्समंदीयं पूयते मानवस्त्र्यहात्॥ सोमारौ
द्रं तु बह्वेना मासमभ्यस्य शुध्यति॥ स्रवंत्यामाचरन्स्नानमर्यम्णामिति
च तृचं॥ अब्दार्धमिंद्रमित्येतदेनस्वी सप्तकं जपेत्॥ अप्रकाश्यं कृ
त्वाप्सु मासमासीत भैक्षभुक्॥ मंत्रैः शाकलहोमीयैरब्दं हुत्वा घृतं द्विजो॥
सुगुर्वप्यपहंत्येनो जप्त्वा वा नम इत्यृचं॥ महापातकसंयुक्तोऽनु
गच्छेद्गाः समाहितः॥ अभ्यस्याब्दं पावमानीर्भैक्षाहारो विशुध्यति॥
अरण्ये वा त्रिरभ्यस्य प्रयतो वेदसंहितां॥ मुच्यते पातकैः सर्वैः
पराकैः शोधितस्त्रिभिः॥ त्र्यहं तूपवसेद्युक्तस्त्रिरह्नोऽभ्युपयन्नपः
॥ मुच्यते पातकैः सर्वैस्त्रिर्जपित्वाघमर्षणं॥ यथाश्वमेधः

ऋतुराट् सर्वपापप्रणोदनः। तथाऽघमर्षणं सूक्तं सर्वपापप्रणो
दनं। दृष्टो लोकानपीमांश्चीनूत्रश्च न्नपियतव्रतः। इदं धारय
त्सांगानेनः प्राप्नोति किंचन। कूष्मांडीनां समन्यस्य यजुषां वास
मादितः। साम्नां वासरहस्यानां सर्वपापैः प्रमुच्यते। यथा महाह्र
दं प्राप्य क्षिप्तं लोष्टः प्रणश्यति। तथा दुश्चरितं सर्वं वेदे त्र्यावृत्ते मज्ज
ति। ऋचो यजूंषि चान्यानि सामानि विविधानि च। एष ज्ञेयस्त्रिवृद्वे
दो यो वेदैनं स वेदवित्। अत्रिः। सर्ववेदपवित्राणि वक्ष्याम्यहमतः
परं। येषां जाप्यैश्च होमैश्च पूयंते कल्मषाद्धृताः। अघमर्षणं देवकृतं
शुद्धवत्यस्तरत्समाः। कूष्मांड्यः पावमान्यश्च दुर्गा सावित्रिरेव च। पंकुर ५२
सतरुद्दमैत्र्यापहिरण्यत्रिसुपर्णंमिदाव्रतं। सानिषंगापदस्तोभाः सा स १
पाव १

मानि व्याहृती स्तथा। सैन्नारुंडानि च सर्वाणि गायत्री देवतं तथा।
गोसूक्तं श्वेद्वसुक्तं च शोधये सूर्यसामनी। त्रीण्याज्यानि च होमांश्च
निरथंतरं चाग्निव्रतं वामदेव्यं बृहच्च यापि एतानि जप्तानि पुनंति पापा
त्। जातिस्मरत्वं लभते यदिच्छेत्। इति सद्विरचिते सारसंग्रहे कर्मविपा
के दैनिककर्मप्रायश्चित्तानि। ब्रह्मपुराणे। सनत्कुमार उवाच।
पातिश्चासहस्रकलशैः स्नानं विप्रैः संपूजनं तथा॥ तद्विष्णोरिति मंत्रेण द्वि
पत्रेवाष्टुनतत्रयं जुहुयाद्दशांशेन आज्यं तिलविमिश्रितैः सकृत्संनो

त्रयो विप्रान्शतं वा शक्तितो बुधः। पानीयं पायसं सुक्तान् नूत्नार्कीरं
घृतमिश्रं पि। दीयमानं नराणां हि हरेत्सर्वांगवेदनां॥ इति सर्वांगवे
दनाहरं॥ ८॥ अथाक्षिरोग॥ अधिकारी पंच महापातकान्करोति।
तस्याक्षिस्फोटितादिरोगाः क्षिप्रं जायाते। तत्र लक्षं चांद्रायणं स्त्रया त्रये
तिष्टो मासं पयोव्रतः। ईक्षितं गोदानं दद्याद्या छिद्रं स्यः अक्षितान्व
हो वातश्वावानमं त्रपण्डबुद्धा बद्धं कुर्यात्ततः। हिरण्यं द्विजमुख्याय द
द्याद्रोगाद्विमुच्यते॥ इति अक्षिरोग॥ ९॥ अथ दारुणकफव्याधिः॥ X
यो नित्यकर्मनिष्ठानपराङ्मुखो नास्तिको भवति स सावरुन्निनृय
मानो भवति तथा वा अक्रं यमेन। नित्यानुष्ठानविमुखः कफरोगी न २०१
वेन्नरः। परामवं सदाप्नोति तस्मात् तगवानुयमः। ऐंत तपत उपशां

तये। मासमेकं यावत्काहारः स्यात्। सहस्रनाम स्तोत्रं च जपन्नाना
मत्रयणाष्टोत्तरशतं च रुघृताभ्यां प्रत्येकं जुहुयात्। सहस्रशी
र्षनिविष्णुप्रजनं शक्त्या विप्रांश्च भोजयेद्दिनि॥ इति दारुणकफव्याधिः॥
अथ विद्रधिरोग। तत्र हेतुर्वो दायनः। विद्रधीफलं दत्तं स्यात् मनुष्या
ब्राह्मणस्य द्विवर्द्या। मितत्प्रतीकारं दानहोमादिकर्मणा। पल
दंनतदद्दैन तद्दधार्द्विनिवाप्नुनः। यथा विनवतो वापि कुर्यादाघ्र
तरुं श्रुत्वा। स्निग्धमश्वत्थेवरन्नेषु सर्वतः परिवेष्टयेत्। ब्रतवस्त्रेण सं
वेष्ट्य फलैरपि सुकल्पितं। गंधपुष्पैः समभ्यर्च्य तंडुलोपरि विन्यसेत्।
तंडुलानां परीमाणं द्रोणानां तु चतुष्टयं। तदर्धमथवा कुर्यात्तियथा
वित्तवान्नरः। आचार्याय निवेदिनी नाश्च सर्वशास्त्रार्थतत्वविद्धर्म

ज्ञः सत्यवादी चकुलीनो लोकसंमतः। आकाशपरिव्याप्तैन क्षा
तेन चूडालिकारयेत्॥ वनस्पतिरश नयेच्च तेन चूडनादिको। आ
ग्नेय्यां दिशि होमश्च समिदाज्यतिलैर्वितु। मंत्राश्च शास्त्रना
दृष्टा नानावारस्तु मिथ्यापि तिलहोमा व्याहृतिभिरष्टोत्तरस
हस्रकं। यद्दहं वा ऊं मंत्रेण आज्यं च दामश्च शस्यात। ग्रहशां
तिश्च कर्तव्या घंटा लोक विध्वनं ततः। ऊ वाऊ वाचसंपातान्
पात्रेस्मिन् निधापयेत्। तेन विद्रधि रोगं तं समभ्यर्च्यात प्रय
नतः। अनरूत्तरदिग्भागे कलशस्थापनं स्मृतं। तद्वासनाप विप्ता
य आ हिषेकं समाचरेत्। तत स्नुक्षां वरयश्च रक्त माल्यानुले
पनैः। सौवर्णमाषद्वन्द्वं तं प्रदद्यात् प्रयत्नेन सुरवाय यत्ना गंधपुष्पैः २०२

वस्त्रैः पूजिताय रोगी स्वयमुदङ्मुखः। मंत्रः। आम्रवृक्षं ब्रह्मणा सृष्टं
सर्वप्राणिहिताय च। वृक्षाणामादिभूतश्च देवानां प्रीतिवर्द्धनः।
पल्लवैर्यणियत्वास्मां विरूप्यै पूर्वजन्मनः। त्सो वर्षा अप्रदानेन विष्णु
सर्वसंपद्वता। विद्रधीनां शरीरोत्थं बाह्यमाभ्यंतरं मम। विनाशय त
स्कलं चैव स्फोटकं कुरु वै तु मां सदा। ठ॥ दानमंत्रः॥ एवं दत्वा तु तद्दानमाचा
र्याय निजक्तितः। शनैः पदशतं गत्वा प्रणिपत्य विसर्जयेत्। अन्य
त्या पिदिविप्रेभ्यो दद्यात् शक्त्याथ दक्षिणां। नीरांजयित्वा शतं वि
प्रान् सद्वसुं डीन वैधुज्जित्वा। इति विद्रधिनाशनं आम्रतरुदानं॥ छ॥ अ
थ गलगंडरोगा। गलगंडी गण्डः व्याद्दनामित्व तिमानवः। दानन तत्
षतीकारं च द्यामि श्रृणुनास्कं रामाणि कांपगरसंघं वकौ मौलि

कमेवचाविद्रुमं पुष्परागं च गोमेदं मरकतं तथा। पतेमलिंकवीत
स्त्रमप्यस्पराडतं। अलाभे मौक्तिकादीनां मालायां। इमं कल्प
यत्नात्सर्वत्र राडतं अत्र मिलितादितः प्रकल्पितं ताम्रपात्रे विनिक्षिप्य
तिलानामुपरिन्यसेत्तु तिलानां च परीमाणं द्रोणपंचकमिष्य
ते। यद्वा तदर्द्धमेवस्यात्स्वशक्त्या वापि कारयेत्। अथ शांतिं त
थाकुर्यात्द्विब्राह्मणौ वेदपारगौ। आचार्यश्च श्रुतिविदक्षः सर्वशा
स्त्रार्थतत्ववित्। कृतवृत्तोपसंपन्नः सर्वत्र हितातरतः। एवंविधं प्र
णिपत्य वस्त्रमाल्यानुलेपनैः। होमं च कारयेत्तेन समिदाज्यच
रुकदंत्रासंन्नेन तथा मंत्रोगणानामित्यपि मंत्राः क्रम २०३

णसंयोज्या सोमोराजानमित्यपि मंत्रेण। घृष्टम होमः प्रणीतामा
लणा ततामालां च स्थापयेत्पुष्पगंधमाल्यांबरादिभिः। आचार्या
यथतां दद्यात् गलगंडी सुरक्षितः मंत्रेणानेन विधिवत्प्राङ्मु
खाय हर्षदस्तुरता तत्रामालेयं सर्वदैवत्या ब्रह्मविष्णुशिवा
दिभिः। इंद्रादिलोकपालैश्च तथा सर्वग्रहैरपि। हृदयकंठलमाय
धम्मतिप्रीतिपूर्वकं ब्राह्मणाय प्रदत्ता मे गलगंडं व्यपोहतु। इति
दानमंत्रः। अथ शांतिं कृतायैस्तुतत्याद दद्याच्च दक्षिणां। भूषणादवा
वनं च वास्तुंडीतस दवैधुभिः। इति गलगंडरत्नमालिकादानं॥
तथापीतपाणिर्वा॥ शातातपः। पारापतत्वं निहन्ति पीतपाणिः प्रजा
यते। निष्कृतिं तस्य वक्ष्यामि दानस्तुत्या विधानतः। पारापतं समो

वर्षं स्थित्वा निष्क्रमाणे ततः संपूज्य वस्त्रपुष्पाद्यैर्दद्याद्दोषापहं द्विजे
सद्दक्षिणं समंत्रं च पुण्ये पक्षि प्रातरुत्थितः स्वयं स्नात्वा च विप्रांश्च शक्त्या
संतर्प्य वाचयेत्‌ ॥ स्मरन्‌ विश्वपतिं विष्णुं भुंजीत सह बंधुभिः ॥ इति पाणि
त्रेदहरं पारापतदानं ॥ ७ ॥ तथा च ॥ कंदमूलापहरणात्‌ स्वेदरूक्षपाणिः
प्रजायते तेन तद्दोषनाशाय कार्यं कृच्छ्रत्रयं ततः ॥ देवतायतने कार्य
मुद्यानं चापि शक्तितः ॥ कंदमूलं तथा दद्यात्‌ शक्त्या दक्षिणया त्वितं ॥
ब्राह्मणान्‌ भोजयेदन्नसंयुक्तं धर्मचारुद्वंद्वं यथाविधि ॥ इति रूक्षपाणित्व
हरं कंदमूलदानं ॥ तथा च ॥ क्षीरहारी च कुरूपं छिन्नपाणिर्विंदति ।
दिनत्रयं स तिष्ठेत पयःपी वा तु धर्मधीः ॥ दद्यात्‌ लवणसंयुक्तं काश्मी
रनपलत्रयं लोकपालाष्टकं पूज्य तावत्‌ संतर्पयेद्द्विजान्‌ ॥ ७ ॥ इति २०५

छिन्नपाणित्वहरं कंदमूलदानं ॥ ७ ॥ तथा ॥ क्षीरहारी च कुरूपः छि
न्नपाणिर्विंदति । दिनत्रयं स तिष्ठेत पयःपी वा तु धर्मधीः ॥ दद्यात्‌ लवण
संयुक्तं काश्मीरं नपलत्रयं लोकपालाष्टकं पूज्य ॥ इति छिन्नपाणित्व
हरं काश्मीरदानं ॥ ७ ॥ अथ हरीतकी रोगे ॥ तत्र गो च हार्हरीतकी च वा
रोगार्तः पूर्वकर्मणा । तत्र पापदोषशुद्ध्यर्थं धाऽपय्यशतं चरेत्‌ ॥
व्रतांते तामदिनीं दद्यात्‌ धेनुं याज्ञापिनारतं । [illegible] त्रपराश्चिता [illegible]
ये [illegible] इष्टबंधुः समायुक्तः स्नात्वा भुंजीत वाग्यतः ॥ ७ ॥
इति हरीतकी रोगहरं प्रायश्चित्तं ॥ ७ ॥ तथा च ॥ सर्वकार्यविघ्नसिद्धार्थे गि
ड घातान्नरोऽभवेत्‌ तत्‌ दोषविघातायनियमेन समन्वितः ॥ प्रासादं
कारयित्वा तु गणेशप्रतिमां न्यसेत्‌ ॥ अथ वा गणनाथस्य मंत्रं लक्षमि

तंडपेत्॥ दशांशं होमः स्यात् पूर्णे गणिशांतिपूर्वकं सदा॥ सदस्तंत्रो
डय विप्रान् शतं वा पि वशक्तितः॥ पायसा मोदकैश्चैव शर्करायाघृ
तमिश्रितैः॥ गणशांतिविधानेन स्नात्वा वाद्यैः तर्पयेत्॥ ७॥ इति
कार्यअसिद्धिहरं गणेशप्रसादस्थापनं॥ ७॥ तथा च॥ प्रतिमानं
राकारी चेदप्रतिष्ठाप्य वदिहादि नपं त्रयं पयोव्रतं सतिष्ठं सतद्दा
षदरं श्रेष्ठं कुर्यात् दिश्चौ सेवनं संवत्सरत्रयं सिंचेदश्वत्थं सानुवा
सरं॥ वह्निकां परितः कुर्यात् शक्त्या पाषाणकाष्ठजां॥ आनानां च तथा
त्रनिं कुर्यात् विप्रामं त्वं मिकोत्सुरालये तथाश्वत्थे दीपं सन्मार्जनादि
कोष्ठं यं च पत्रपञ्चवा प्रतिष्ठां श्रयमेवति॥ ७॥ इति अप्रतिष्ठवं
दरं अश्वत्थसिंचनं॥ ७॥ तथा च॥ दुष्टवादी पीडितः स्यात् सदा यादि २०५

द्विजातये॥ मासं पयोव्रतस्त्रिचासाध्नू द्रवांस्तथा स्तुवन्॥ रूप्यंपल
त्रयं दुग्धं ग्धघटत्रयसमन्वितं॥ देवत्रयं तथान्यच्च पीडितचाद्वि
च्यते॥ ७॥ इति पीडितचहरं रूप्यदानं॥ ७॥ अथ दारिद्र्यहरं॥ वाञ्छ
पुराणे॥ बौधायनगौतमश्च॥ दरिद्रो जायते मर्त्यो दानविघ्नकरो
हियः॥ ऐश्वर्यं जायते येन कर्मणा तन्नृपोत्तम॥ पलार्द्धेन तदर्द्धेन तद
र्द्धेनाथवा पुनः॥ प्रतिमां तु कुबेरस्य कुर्यात् स्वर्णमयीं शुभां॥ विधिज्ञो
वाह्नापतां नयनानंदकारिणीं॥ शंखपद्मनिधिस्थां वसेत्कोपा
श्रियाद्ययाः॥ श्वेतवस्त्रेण संवेष्ट्य तंडुलोपरि विन्यसेत्॥ तंडुलानां परी
माणं नवद्रोणं च तुष्टये॥ नरद्रव्यापि कर्त्तव्यं वित्तशाठ्यं न कारयेत्॥ श्व
तमाद्यां वाणगंधैश्च पुष्पैः प्रपूजयेत्॥ आग्नेय्यां दिशि होमश्च समि

दद्यात्तिलान्विदुः॥ मंत्रोऽत्र राजराजाय येषयोऽपः स्फुलिंगकः॥ याह
त्पातिलहोमस्तु कर्त्तव्यो धनकांक्षिभिः॥ आचार्यमित्रसन्नद्धः सरको
मीश्वरानावतुड्वँ तस्मै होमं तन्नव तत्प्रदद्यात्सनिमोऽनेनो मंत्रेण
ाननविधिवत्प्राङ्मुखाय कुद्दष्टुषे॥ तत्रोऽत्र राज्ञापातदेवकोद्र
नरवाहनाशेषपद्मनिधीनां वं पतिः श्रीकंठवस्त्र मः॥ दानघातात्तुय
तुष्टाप्तदारिद्र्यं दुःखवर्द्धनी॥ तवदानमतम्भेर्वै सम्मुष स्वतुद्वणात्तुद
ताइतिदानमंत्रः॥ इति द्रव्यधनाधीशं ध्यमत्वाचतस्रियन्नः॥ दरिद्रना
शं संप्राप्य प्रथद सुखमाप्नुयात्॥ अन्यांश्च विप्रान्संपूज्य घणिपृथ्वविस
र्जयित्॥ स्वयं च भोजनं कुर्यात्तु हृष्टैर्बंधुजनैः सह॥ ध्यायेच्च राजराजेशं वाग्य
तः प्रयतः सुखी॥ इति दरिद्रहरधनदमूर्त्तिदानं॥ ७॥ अथ रक्तस्त्रला॥ x २०६

१ ३ लि x तत्र बौधायनः॥ अभिचारोपधादीनि x

हरं कालचक्रदानं॥ ८॥ मृत्युंजया x
रपद्मदानं॥ ७॥ अथ अपमृत्यु रश्मिमयात्मकं कालवामूर्त्तिः शिरश्चंद्र
तु॥ चक्रं रूप्यमयं चैव चामुक्ता पाणिगात्रेषु समंततः॥ एवं ध्या
श्मिमध्यांतरस्थितं॥ नमाम्यानकरूं सकार्यस्थिति
नवतस्य सस्वंद्वः तत्र तां प्रजातु॥ स्वयं चाप्मृतसंघातहृत्सकार्यस्थित
नवतस्यस्वच्छंदः तल्लतां प्रजातु॥ तत्र मंत्रः॥ एनांतरा
स्थितः॥ कालचक्रमिदं नाम्ना दानं मृत्युविनाशनं॥ तत्र मंत्रः॥ एनांतरा
तं चंद्रं रश्मिजालसमाकुलं॥ अपमृत्युविनाशाय ददामि प्रीयतां शि
वः॥ इति दानमंत्रः॥ इत्थं चक्रोत्तमं द्विजे दद्यात्सुवर्णदक्षिणान्वितं॥ एवंचे
त्तत्तु पापात्मक अपमृत्युं विनाशयेत्॥ तस्मादेतत्सदा देयमपमृत्युहर
यात्त्वितः॥ कृरादिरोगग्रस्तैश्च मद्यापद्यनितिरपि॥ नानाटद्यो के विधि
मास्थापयज्ञानवद्सौ सुकृयाकालनाम्नानुज्ञातम प्राप्त्वरतिला॥

८

ततस्तु महायज्ञस्या विप्रान् द्वादशसंख्यया। आचार्यं मद्वारमग्रा नैके
वीतस्सहदेवदि। एवं दत्ते नरो नूनं डी विघ्निर्मसंशयो। यस्मिन्का
लेऽद्भुतदुःखकर्मातिरक्तं नरः। पुनस्तदागात्काले त्रपष्ट्यु
प्रदं नवेत्तु। एवं मृत्युज्ञातं सकंटणामुत्पाद्यते किल। पूर्वं मृत्युज्ञा
तं न्यूनं दानमेतत्तु प्रसाधितं। साद्दोन्मृत्युस्तथा कायान्नलवद्धि
तिनिश्चितं। दानमेतन्नरस्तस्मादेयं मृत्युशतापहं॥ इति अपमृ
त्युहरं कालचक्रदानं॥ तथा च॥ मृत्युहरं यमदानं॥ तत्रोक्तं
वचोऽस्मदा पापनरो यान्निरतो भवेत्तु। विघ्नात्त्रियाऽधिवक्कुलस्व
स्य मृत्युः पदे पदे मृत्युजय्या तु। लोहपात्रे स्थितं कांस्यं तत्र पश्चे
त्युयजतं। तस्मिन्कालेश्वरः स्वार्सि द्विरूपाकारतां गतः। यमरूपे २०८

बृहत्या उदाने दृष्टव्या वस्त्रालंकारसंयुक्तो न्ययदास्त्राणि सर्वतः। त्रिलोहाकार पुरु
षः कालदूतेश्च पार्श्वतः। न्ययदास्त्राणि खड्गछुरिकादीनि। त्रिलोहं तांम्र कांस्य पित्त X
लाख्यं। कालदूताः पुरुषाकृतयो दंडहस्ताश्च यः। रुवामहिषपृष्ठे तं दद्यात्तु यम मा
लपनं। अष्टम्यां वा चतुर्दश्यां करोति विधिनात्र यः। समुच्चत्ते ध्रुवं मृत्योर्दत्वा घृतघटोत्त
रं यममालपन्निति महिषपृष्ठस्थितलोहपात्रो परिस्थितकांस्यपात्र विनिष्टपनाम्रु
द्वयमं ददामीति प्रयोगमुच्चारयन्नित्यर्थः। घृतघटोत्तरो दक्षिणस्थाने यस्येति दान
विवेककारः। अन्यत्र दक्षिणस्तु वर्सीत्रनेति व्यक्तिः। तत्र मंत्रः। धराज महोऽपापेभ्यो
ममयो मृत्युकृत्संग्रहः। दानेनानेन सुप्रीतो मृत्युंहरन्तु तं ममः। दानमंत्रः। एवंकृते म
हादाने नरो व्याधिविनाशनो प्रदः। सर्वपापोक्तमृत्योर्विमुक्तः सुखेन भवेत्। तिष्ठानु दद्या

चपानीयमन्नंघृतमथोत्तरां कनकं शक्तितो दद्यादपमृत्युहरं परं॥ इति मृत्युहरयमदा
नं॥ अथ रोगहरं॥ ब्रह्मांडपुराणे ब्रह्मोवाच॥ भगवन्प्राणिनः सार्वरोगार्त्ताः प्रभ
वंत्यतः एषां तत्परिहारार्थं किं कर्त्तव्यं जगत्पते॥ इत्युक्तो भगवान्ब्रह्म
णा परमेष्ठिना॥ यदाहृतास्मि तत्सर्वं ब्रवीमि शृणु निसत्तम॥ आधयो व्याधयश्चै
व शरीरपरिशोषणाः॥ तु एषां तत्परिहारार्थं कर्त्तव्यं दित्तमिच्छता॥ ज्वरातिसारा
यक्ष्मा च गुल्मश्शूलं भगंदराः॥ कुष्टाग्निरोगा वातश्च कंठशूलमसूरिका॥ कंठ
नाडिकर्णाक्षिशिरोरोगाः पिडिकिका॥ त्रिदोषसंभवाः॥ सार्वरोगाः प्राणिनां यं क
राः॥ ग्रंथयो मूत्रकृच्छ्रं च वस्तिरोगो मूढोदरं॥ एते चान्ये च बहवो महावेगाम २०९
हाबलाः॥ व्याधयः शतसंख्याका मृत्योर्दितिव एवतो यद्घ्नरोगसमं जयंतिक्ता

यं च मनी॥ मिति॥ औषधं जपहोमादिदानं होमार्चनादिकं॥ सर्वरोगप्रशमनं सौ
वर्णदानमुच्यते॥ ज्वरमसूरिकायां च राजयक्ष्मणि चैव तत्॥ गुल्मे तदायसे
घोकं कुष्ठे रजतमुच्यते॥ रत्नदानात्क्षयं याति शुद्ररोगाश्च सर्वशः॥ रामस्याडुते
रव्याधेर्नृहानां कमलासनानाशमार्थं वा तरोगाणां वासोदानं विधीयते॥ कं मजिक
ड्यादीनां रोगाणां शांतिमिच्छता॥ धान्यं वासो हिरण्यं वा दातव्यानि प्रयत्नतः॥ स्तु
वर्णदानं सार्वभौ रोगाणां शमकारणं॥ तस्मात्सर्वप्रयत्नेन दातव्यं कमलोऽथवा।
अक्षिस्थे न वरोगाणां आज्यं कनकसंयुतं॥ पानीयं पायसं मुक्ताः शर्करा घृतसंयुता॥
सर्वांगतो द्वकासेनु षंडं विस्फोपवहीणां दद्यादिकं गरागाणीकं बलं कनका
च्चितं॥ इत्यादिदानविधिना रोगाद्रागी प्रमुच्यते॥ यद्यापि प्रतिरूपं हि व्याधेर्दद्याद्वि

धानतः सुवर्णरजतेवीप्रियथाशक्त्यास्वरूपतनत्वा नृपतिमांयाधेर्दद्याद्विजाये
तितनुयाधिप्रतिरूपदानविधानं॥ पूर्वंह्ययारोगहाधिकारेउक्तंद्रष्टव्यं॥ एवंबहुविधं
त्रांत्येरागाणांकमजास्मनाकायमुक्तंमयातेद्यकिमन्यत्कथयामितो॥ एवमुक्तोभगवता
ब्रह्मालोकपितामहा॥ यदाहनारदायेदंमयातत्सर्वमीरितं॥ इतिरोगहरदानानि॥
अथस्त्रीणांवैधव्यहरं॥ निर्लज्जायाश्चयंपुंसांकेशाशोवैंशदर्शिनी॥ वैधव्यंपुत्रशोकंच
सानुयाज्जन्मजन्मनि॥ तत्रांबाहरणंकार्यंगौर्याःसर्वसौभाग्यदा॥ सौभाग्यसुंदरीनाम
समभ्यर्च्ययथाविधिः॥ सितायांतृतीयायांसुवासिन्योष्ट भोजयेत्॥ फलकंचुकदा
नेंचदेयात्रीत्यर्थमेवच॥ सौभाग्याष्टकदानेननवैधव्यमवाप्नुयात्॥ मनसस्त्वतिनि २१०
मील्यात्कुलकोटिज्यवर्जिता॥ इतिवैधव्यहरसौभाग्यसुंदरीपूजा॥ मृतप्रजाभावना

रीफलंदत्वाहरेत्तुयात्॥ तथाप्रथमसंतानदेयंकस्यापिहर्दतः॥ असंतानवतो—बंध्योवा
गोत्रिणेपिवा॥ गौरीमहेश्वरप्रीत्येततःसंतानमाप्नुयात्॥ तथाचयासः॥ दत्वाश्वर्णमयं
त्रंनिष्कत्रयंतदर्द्धकं॥ तदर्द्धंवातथादद्यात्॥ तावादवदिकोभने॥ इतिमृतप्रजायाप्रथ
मसंतानदानंतथा॥ वैन्वयिवाचनारीरंयापुमांसंपरंममेत्॥ बालवैधव्यमाप्नोतिकौ
मार्येचबहुक्लिष्टिता॥ तत्रनारीतस्योपघातायत्रिकालंगिरिजांयाजेत्॥ एकस्तुक्तपरामासे
ततोश्वत्थंविवाहयेत्॥ शम्यास्समंत्रविधिनाशक्त्यादानंप्रकल्पयेत्॥ इतिबालवैधव्य
राश्वत्थपरिणयनं॥ तथा॥ अन्यासामनयत्यत्वमिच्छंतीयेवंध्यतां॥ लभेत्॥ नयाशुश्रूष
णंकार्यंगवांमासंप्रयत्नतः॥ पयोव्रतेनतिष्ठंत्यागुरुवंदननम्रया॥ व्रतांतेवत्ससंयुक्तां
तांदुग्धांधवलांसितांददेत्॥ विप्रवर्यायविधिवत्॥ ततःसंतानमाप्नुयात्॥ पंचगव्याशि

नीत्वा सहस्रं भुंजीत वाग्यतः॥ इति वंध्यत्वहर धेनुदानं॥ तथा परापत्यानि यादेष्टि सा सं
तानं लभेच्चिरात्॥ शांतिस्नानं तथा कार्यं परित्यज्य तु वत्सरं॥ शातं च गोऽयेद्विप्रान् दद्या
द्द्राक्षाफलानि च॥ चूतानां च बलिं दत्वा ततः संतानमाप्नुयात्॥ इति चिरापत्यहर शांति
स्नानं॥ तथा॥ पुरुषद्वेषिणी नारी स्त्रीप्रसूतिर्न वध्रूवां तया पुरुषसूक्तैस्तु स्तुत्यः सं
वत्सरं शिवः॥ व्रतांते हेमधेनुं दद्याद्देवं गंगातटस्थकं॥ ईदृक् धेनुसमायुक्तं शिवसं
प्रीतिपूर्वकं॥ गोऽयमहाराजवर्णं न त्याज्य इहमामोनकं॥ इति स्त्रीप्रसूतिहरं गोमि
थुनदानं॥ तथा॥ व्रतदानक्रियाहीना काकवंध्यत्वमाप्नुयात्॥ प्राजापत्याष्टकं कृत्वा रु २११
द्रजाप्यं तु कारयेत्॥ नानान्नैर्ब्राह्मणान् श्रेष्ठान् तर्पयेद्भूषणैस्तथा॥ वस्त्रैरन्नर
णाश्चैव पूजयित्वा विसर्जयेत्॥ इति काकवंध्यत्वहरं॥ तथा॥ सा नापि काकवंध्या स्या

जन्मपातं करोति या॥ तया तु कन्यावरयोर्देया सप्तफली स्वयं॥ नालिकेराणि सप्तैव
मातुलिंगानि सप्त च॥ दाडिमीफलसप्तानि जंबीराणां च सप्तकं॥ सप्तोत्तरीफलान्या
ऊः सप्त द्राक्षाफलानि च॥ नारिंगसप्तकं तद्वदेवं सप्तफली स्मृता॥ सुवर्णरजत
स्यापि मुद्रिकद्वे समर्पयेत्॥ एवं कृते प्रयत्नेन यथा धर्मं चार्चिते प्रजापतिः॥ प्रजाप
तिरत्र सर्गकर्त्ता काकवंध्यत्वदोषं विमुंचति न संशयः॥ इति काकवंध्यत्वह
रसप्तफलीदानं॥ अहं मन्या च या नारी भोगदानविवर्जिता॥ अवमन्यते देवगु
रून् सा च विधवा भवेत्॥ तत्र सा हरिणा सार्द्धं तुलसीं परिणापयेत्॥ शास्त्रोक्तविधि
ना सर्वं परिपाल्य हरिप्रियां॥ शान्नादानादिकं दत्वा ततः सुतां न वेदिहा अवारितान्ने
दानतः सहस्रं भुंजीत बंधुभिः॥ इति वैधव्यहरं तुलसीपरिणापनविधिः॥ तथा चाडु

बुद्धिहाकलत्रीणु परसौख्यकरीं च या॥ अनाईवरतानित्यं नष्टसौख्यं न सा लभेत्॥
तया तद्दोषनाशाय स्वयं स्नात्वा प्रयत्नतः॥ प्रत्यहं वत्सरं यावद्धस्मा स्वहजनार्द्दनौ॥
हिरण्मयं समभ्यर्च्य प्रातः प्रातर्यथाविधिः॥ ॐ कामेः कङ्कालेहूपेः कंवप्रांते स्वंद
निः॥ पुष्पैर्नानाविधैः पूज्य भोजयद्विप्रदंपती॥ लक्ष्मीनारायणौ यद्वत्तद्वत्संपूजयेच्च
तौ॥ वत्सरांते च तौ दद्याद्धेमौ लक्ष्मीजनार्द्दनौ॥ गां च दद्यात्तथा दोग्ध्रीं दावाममीय
तामिति॥ आहारजलपानं च तांबूलं सुखलक्षणं॥ प्रीयतां तौ महादेवाविति संवत्स
रं ददात्॥ एवं तत्त्वा तथा दत्त्वा नारी दोषैर्विमुच्यते॥ पतिसौख्यं चासौ नाप्नुयं प्राभो २१२
त्यवमखंडितं॥ इति वैधव्यतथा भर्तुरसौख्यहरलक्ष्मीनारायणदानं॥ ॥ अथ न
स्मकरोगो॥ अस्नेहालं नसाकार्थं योजुहाति कृताशनो॥ सोवे नस्मकरोगी स्यात्तत्र का

र्यप्रतिक्रिया॥ सक्रोधसहितं स्नेहरहितं च रूक्षं यत् द्रव्यं कृताशनोद्वेगकरं जुहो
ति॥ तन जन्मांतरे नस्मकरोगाक्रांतो भवति नरः॥ तत्र जातवेदसे स्वाहेति सहस्राज्या
हुतिप्रमाणं साष्टकं कुर्वात्सहस्रं द्विजानां घृतपायसशर्करान्वितं भोजयेत्॥ तथा अ
श्वत्थीपालाशीवा समिधं आज्याहुतिसहस्रं जुहुयात्॥ कर्त्तव्यो होमः सर्वस्वं प्रदशां
तिविधानतः॥ संपातास्यं ततः प्राश्य स्नात्वा रोगाद्विमुच्यते॥ जातवेदसेति मंत्रेण
विशेष्यसहस्रसमिधो मः पूर्वोक्तः इष्टं बंधुजनैः सार्द्धं भुक्त्वा सौख्यं लभेन्नरः॥
गुहं च जुहुया तत्र गुडं द्वा वनिवेदयेत्॥ गुडदानं भोजनेन च शांदयस्य शाम्रणी॥ इति न
स्मकरोगो॥ तथा अरुचिः॥ अनिच्छया यो येन नियमेनाथवद्ध एव विपद्यते॥ दैविकेना
थापेन्येण सतस्मिन्न रुचिर्नीवतु॥ जन्मांतारे च अनिच्छः स नरः सकृयान्निद्धिशोधनौ॥ तत्र दा

नंप्रदातव्यंस्नात्वाचैकाग्रानेदनिष्ठत्वेदनिसमभ्यर्च्यदरिद्रापारिमादरात्॥ अत्रं
वागोरसाश्चापियत्रयस्यारूविन्न्नावत्॥ सतद्द्वाद्विजश्रेष्ठदोषमुक्तोनवेधुवंतेन
द्रव्येणसंतर्प्यविप्रान्नूवंभूयश्चदुःस्थितान्नरान्॥ तोहोमःप्रकर्तव्योवक्ष्येपुरुषसूक्तत॥ व
ह्निकल्पसमुद्भूतंमंत्रंवातत्रकारयेत्॥ इति श्रीरुचिरहरां॥ अथनानारोगप्रशांत्यापुरुष
दानविधिः॥ तत्रसुवर्णतुलाप्रमाणैः॥ अष्टंदिनमथासाद्यनरःकुर्याद्विपक्ष्मोगोमये
नानुलिप्तायांभूमौकुर्याद्विटेष्टकैः तोदारवंशुनष्टहस्त्यचतुर्हस्तप्रमाणंततःसुवर्णं
तत्रबध्नीयात्स्वेशक्त्याघटितंघटोस्तुवर्ण्णंघटितंबध्नीयादितिपद्मादिरूपां॥ सोव २९२
र्ण्णस्थापायतत्रवासुदेवंचतुर्भुजः॥ उन्नदारः॥ स्तंनरषटहस्तप्रमाणोतन्मध्ये
हस्तद्वयंनिष्पन्नोबहिर्हस्तचतुष्टयं॥ उत्तरंगकाष्ठहस्त ४ तन्मध्येलोहकटकं॥

उत्पादंडंषडहस्तवाहस्त ४ तत्त्वांतद्वयेरकटलोहरमध्येतावलंबनकटकं॥ उत्पा
दंडःसाखीपवामध्येसोवर्णश्रीविष्णुमूर्त्तिः॥ दक्षिणेतरशांतयोर्इमेराजतथास्त्रयंमू
र्त्तिर्बध्नीयात्॥ अथवावामदक्षिणयोर्हस्तयोर्ष्टखांकरूदेउत्पा॥ उक्तंयततत्त्वारू
देसवस्त्रास्वेःउष्पाजंकारस्तूषितः॥ अनीष्टादवतांस्वहस्तपयिवाष्टतादिनि॥
उत्पादानस्यसर्वस्यविधिरपप्रकीर्त्तितः॥ मंत्रास्तत्रापिपूर्वोक्तास्तुप्लादानेषुद
र्शिता॥ अथगारुडपुराणे॥ सनत्कुमारः॥ उत्पापुरुषदानंतुश्रेष्ठंशृणुसत्यंजयोऽ
र्वांत्रष्टलोहंप्रदातव्यंसर्वरोगोपशांतये॥ तत्रकांस्यंत्रयस्त्रणादयंत्रपुचासी शौ ३
विकारतः॥ अपस्मारीचसीसंस्यात्तानंकष्टेस्तुदारुणे॥ पेत्तलंरक्तपित्तेचरूप्यं
प्रदरमेहयोः॥ सौवर्णंसर्वरोगेषुप्रदद्यान्मृत्युनोदनं॥ फलोद्भवंतथादद्याय

ग्नि
हणेदीर्घवारुणे।गोडंनस्मकरोगेचपौगंडगंडमालके।जांगलंचासिंमांघेनरोमोत्था
तेत्रापोष्यदं।जांगलंकाष्ठजमिति।मधूकवृंतथादेयंकासश्वासेऽजलोदरे।घृतोद्भवंत
थादेयंछर्दिरोगोपशांतये।क्षीरंपित्तविनाशायदधिकंनगदारणे।लावणंव्रणनाशा
यापेष्टंदद्रुविनाशने।अन्नंचसर्वरोगस्यनाशनेस्मृतमेवच।अथोद्रव्याधिदे
वतानि।अधिदेवतंलोहेचमहाभैरवउच्यते।कांस्येचद्रुपाग्निनोवृस्मृतोवायुश्च
सिसके।ताम्रेसूर्यस्तथाप्रोक्तःपित्तलेचकुजस्तथा।रौप्येचपितरोज्ञेयाःसुवर्णेस
र्वदेवताः।फलेसोमगुडेचापस्तांबूलेचविनायकः।गंधर्वाकुसुमेचापिजांगलेग्नि २१४
स्तथास्मृतः।माधेयह्नापायनेनघृतमृत्युंजयःस्मृतः।क्षीरेतारागणाःसर्वेदधिविश्व
प्याःप्रकीर्तिताः।पिष्टेप्रजापतिर्दूर्वाऽन्नेसर्वाश्चदेवताः।आज्ञेयदास्यात्पात्रंप्रानु

यात्तुएपदेशतः।नित्यंमृत्युंजयप्राप्तविधिनायत्प्रदीयते।तदेवसर्वशांत्यर्थंनव
तीहनसंशयः।मृत्युंजयप्राप्तविधिनामृत्युंजयंप्रजयिष्येत्यर्थः।मृत्युंजयहत्रावि
धिश्चादवीसुराणे।ॐजूंसइतिमंत्रोयंदेवोयंचचतुर्भुजः।त्रिनेत्रकः।अक्षिमालाधरा
दावादक्षिणेनतुपाणिना।वामेनामृतःकुंडीचक्षरयन्त्रमृताचितां।वरदानय
पाणिश्चदिव्याभरणभूषितः।शुक्लःसुनीलवाससाश्चपद्मस्योपरिसंस्थितः।जाजी
नस्यशिराज्ञेयंजवपाश्वशिखास्मृता।यवोषडितिकवचंजेनत्रंचप्रकीर्त्तितं।जः
फडस्त्रंनवेसदाॐकारआवाहनमंत्रः।ॐकारोवेविसर्जनी।अष्टशक्तयः।पंचाहर
संमिताः।जयाचविजयाचैवअजिताचापराजिता।नंदकालीकपालीचहेम्नामृत्यपरा
जिता।ॐजूंसमंत्रप्रयोगगणप्रज्ञा।मृत्युंजयःशिवः।गंधादिभिर्यथान्यायंयथाब्रा

लणहजनोस्तुत्वं जयोक्तदानेषु सर्वेष्वेवं विधिः स्मृतः॥ सप्तधान्यात् उड्डूसइति वै दा
तुःकामाद्यं साधयेत्सदा॥ जोहे तदा मंत्रमस्तु स्त्रीं इं इदि रापयेत्॥ शिरो ललाट देश
चूलिकामूले वगडयोः नाभौ च ब्रह्मगुह्ये च एतदेगाष्टकं न्यसेत्॥ अरत्निहस्तमात्रं
वासारं तस्य प्रकीर्तितं॥ यथेच्छया प्रयोगेण यथावत्कर्तुमिच्छया पिष्टपलैः संघटित
मज्ञातफालिकं न वेत्॥ लोहं च निष्पन्नमेव तत्र आननमिश्रितं॥ पंचाचात्पलं संस्कृ X
तं दंडं वायसःसंज्ञकं॥ वस्त्रैराच्छाद्य दानेन यम दंडं दानविद्यते॥ तत्र मंत्रप्रयोगार्चन
पूर्वं तु आरोहणं॥ दक्षिण पश्चिमतो द्वारारोपणं॥ द्वाराबीतराता यजमानो रोगीतो लघि
त्वातिविधिना नरो रोगाद्विमुच्यते॥ इति नानारोगघ्न तुला उरूप दानविधिः॥ अथ सर्व २१५
पापरोगहरं॥ पापकर्मस्तु मिश्रेषु पापरोगा नवेत्यपि॥ डूश्चिकित्स्याश्च विप्रमाशतम

नं ददेत्ततः॥ तत्र शातमानं च हृयेन सुवर्णेन विनिर्मितं॥ तत्कांस्ये निक्षिपेत्पात्रे ति
लाढक समन्विते॥ कांस्यपात्र परीमाणं पालानामष्टकं विदुः॥ तिलानां तु परिस्थाप्य
अक्षतांस्तु तशालयः॥ आवाहस्य च देवेशं द्युमणिनानुमयायी॥ गंधमाल्यैः सुरक्तैः
रक्तमाल्यैर्विशेषतः॥ उपचारैः षोडशभिर्रचयित्वानुमादिजं॥ अष्टाक्षरेणाति मंत्रे
णसावित्रेणाति चर्चितः॥ यद्वासविष्टमंत्रेणालिंगेन प्रणिपत्य तु ब्राह्मणाय तत्
पूजां कुर्यात्क्षमस्व हातः श्रुत्वा॥ आनेय च नृपाणेः स्वम्यक स्वकं कृतं वा विरोधतः॥ तस्मै दा
तायसन्नृत्य स्वाचारायात्म वेदिनां॥ शास्तुखायो दत्यदद्भुखःस्वनूद्यात्स्य यतमान
सः॥ मंत्रेणानेन संकल्प्य पापव्याधिविमुक्तये॥ याप प्रोक्तः प्रभाकरः सत्ताश्च रथवा
नः॥ शातमानं ददात्तनु उष्टः सर्वं जगद्गुरुः॥ इह जन्मनि यत्पापं मन्यजन्मनि यत्कृतं॥

संप्रत्ययाच्चाँरोगदुःखान्तिकारणं। तत्सर्वं ह्रपयत्वर्कः पापरोगाद्वितं मम। दानमंत्रः
ततः क्षमाप्य तं विप्रं प्रणिपत्य विसर्जयेत्। यथा प्रसन्नो भवति तथा सर्वं प्रकल्पयेत्।
इति बोधायनोक्तसर्वपापरोगहरदानमानदानं। अज्ञाता पूर्वरोगहरं॥ अज्ञुका
येन रोगाः स्युर्द्दृष्ट्वा तेषां शिवाद्वारिः स्नुवर्णप्रतिमा कार्या अश्विनयोर्गदसंभ्रमो। अनया
र्जपादामश्च हुजातन्मंत्रकेरपिस्नुवर्णं षट्हल्ने रज्याप्रतिमा सर्वकर्मस्नु। भद्रासना
पविष्टाय रोगिणे स्नानं तु तमोन्न वारो वाष्टकलशाः स्थाप्याः प्रतिदिशं स्थनाः। इंद्रादिक्
तीनां दिग्नकै दोव्हविदिक्कु वाजन्हारुद्रस्य जाप्यं वा ऋग्वेदादिक्रमेण वा। अत्र वैणवे
र्वकेनाः स्युः सितवस्त्रेण वेष्टिताः। निक्षिपेन्नवरत्नानि मृत्तिका रोचनां तथा। अश्वस्थाना २१५
जस्थानाद्वल्मीकात्संगमाद्ध्रदात्। पंचकृष्णाः समानीय ह्रदये तु एयवारिणा। तेनाभि

षेकं कुर्वीत आपोहिष्ठेत्यृचक्रमात्। हिरण्यवर्णा इति च पावमान्यस्तथैव च। अग्नीनिर्मं
त्रराजेस्तु अग्निष्पकः सदा भवेत्। वैयाघ्रदारिणं स्निदं चर्म प्राकूलद्दीपीठके। निवेश्यवा
सनेष्ठातत्व अग्निष्पकं समाचरेत्। ह्यादिसर्वरोगाणां भद्रासनमिदं भवेत्। गदस्यदेव
तानां च यद्दाणं स्थंडिलं पृथक्। होमो ग्रहादिदेवानामेकस्मिन्स्थानके तु तमो। अभेरुन्नरदि
स्नागस्थंडिलं कल्नारोस्तु तोप्रावदितं तु कर्त्तव्यमाचार्यः श्रुतिपारगैः। ऐंद्रिकाद्युष्मिकेरो
गंरतदामान्त्रणाशयेत्। यदि न क्रियते होमाद्विछित्तिपातकं स्यादि। होमादितिद्वितीयःपा
ठः आगामिजन्मकोटीषु रोगान्न त्यजते ध्रुवं। ततश्च व्रतहोमः स्याद्रोगी विप्रं प्रसाद्य चाहघा
हेवाहारामंत्रमेनस्तु दीरयन्। देवो विश्वपती मत्यं दानेनानेन तोषितो। प्रभूहरहरीसोगी
पापोछेदरनो मम। दानमंत्रो। इतिदवास्मोपहारो देवविष्णायमानवः दीनों धरूपणान

न्यान्भोजयेद्व्रततः स्वयं पुण्याहवाचनं कृत्वा इष्टबंधुजनैः सह भुंजीत स्वल्पमगु
रुक्षाराम्लपरिवर्जितं ॥ एवं कृते नरः क्षिप्रं दुष्टरोगाद्विमुच्यते ॥ इति अज्ञातसर्वरोगहर x
हरिहरस्तुतिदानं ॥ तथा च सारसंग्रहे रोगोत्तमः ॥ विष्णोर्दधनशास्त्रोद्युरात्मानं यः समापये
त् ॥ स जन्मांतरमासाद्य अविज्ञातगदी भवेत् ॥ अविज्ञातरोगवान् भवतीत्यर्थः ॥ चिकित्स
कारोगसंज्ञामपि कर्तुं न शक्नुवंति ॥ तत्र जपहोमादि सेतुबंधरामेश्वरदर्शनादि कार्यं
तं ॥ तथोक्तं च ॥ विष्णोर्नामसहस्रं तु स्तोत्रमंत्राश्च वै जपेत् ॥ एवमज्ञातरोगी च मुच्येत रा
मेश्वरेक्षणात् ॥ रामेश्वरः सेतुसंज्ञो ॥ गत्वा नान्यः श्रीपर्वतेक्षणाद्वापि गौतमीस्नानतोपि वा ॥
इति सूक्तो न वेत्ति रोगी यस्य न ज्ञायते गदः ॥ पंचाशद्भोजयेद्विप्रान् तेभ्यो दद्याच्च दक्षिणां ॥ २१७
व्याधितानोषधं दद्यात् स्वयं भुंजीत वाग्यतः ॥ इति अविज्ञातरोगहरणं ॥ तथा अन्यद्वे

दो सर्वरोगहरं प्रोक्तं त्रपुदानं सदा नृणां ॥ लोहस्य कनकस्यापि सर्वरोगेषु शस्यते ॥
एवं कृत्वा प्रतीकारं संपूज्याभीष्टदेवतां ॥ अविज्ञातनृणां रोगाः प्रणश्यंति सुदारुणाः ॥ इ
ति सर्वरोगहरत्रपुलोहहेमदानं ॥ तथा च ब्राह्मणविद्वेषरा ज्ञातिस्त्रीवृद्धिगोघ्नके ॥
ब्रह्मराक्षसपैशाचं जन्म संप्राप्नुवंति ते ॥ कुमारीगामिनः पापाः साध्वीं गच्छंति ये बलात् ॥ ब्र
ह्मराक्षसपैशाचीं योनिं प्राप्य पतंति ते ॥ श्रुताध्ययनसंपन्नश्चांडालीं योनिं गच्छति ॥ ब्रह्मरा
क्षसतां याति देवब्रह्मस्वहारकः ॥ विप्रगोष्ठीं हंता च विप्रादेशसमर्पकः ॥ अरण्ये निर्ज
ले घोरे जायते ब्रह्मराक्षसः ॥ इत्यादिभिः कर्मभिर्ब्रह्मराक्षसो भवति ॥ नो चेत्तमसः स्या
न्नत्यो विप्रः सो वा पिशाचः स्यात् ॥ तथाविधकर्मरुद्धारं भवेत् ॥ अतिदुःखानि भूतः परानि
ष्टकरणशक्तिर्नास्ति कश्चेति ॥ तदुपशांतिकरमाह ॥ श्रवणद्वादशीयोगे तत्पुत्रः श्राद्धं सं घ

दिंत्रिस्थलीषु तथा श्राद्धैः पिंडदानैश्च तर्प्पणैः। जपहोमैश्च दानैश्च देवतार्चनकैर्वेत्
मुच्येत गयादिषु कृतैर्ब्रह्मराक्षसतां गतः। शुक्लाष्टमी समायोगे यः श्राद्धं कुरुते नरः। करंजकर
न काद्यैश्च पिंडैस्तु द्विरष्टदुर्गतां। तेन मुक्ता भवंतीह ये केपि त्रिगतिर्गताः। रुद्रानीलष्टमो
त्सर्गं निपानं वा कृत्वा वर्द्धा पिशाचत्वगतान्सर्वान्मोचयत्येव नान्यथा। सहस्रं भोजयेद्वि
प्रान्नूतन्याबादीन् दुःखितान्। पिंडैर्णमां कुरुते मोक्षं दुर्गतानां हरियजन्। ततश्च नारायण
बलिस्तु वा वाविष्णुतर्प्पणं। रक्षःपिशाचायेन्येपि मुच्यंते नात्र संशयः। एतद्देवोक्तं श्रुत्व
त्वा नागयायां पिंडदानेन जपहोमार्च्चनादिभिः। ब्रह्मतर्प्पणतः सम्यक् जपनाद्देवनित्यशः।
देवतानां च सेवाभिः कन्यादानेनान्वद्दि। ब्रह्मराक्षसापेक्षा च्यात् मुच्यते मनुरब्रवीत्। २१८
इति ब्रह्मराक्षसत्वपिशाचत्वहरं। अथ मुत्यामरणे पूर्वकर्मजं कृणानि व्याघ्रादिगजनृ

पालचौरवैरिहृकादत्तां। नृपवह्निदारुशास्त्राश्मविषाद्बंधजलैर्मृताः। विस्टचिकानकव
लचमातीसारतो मृताः। शाकिन्यादियादेर्यच्चा विद्युत्पातहताश्च ये। अस्पृश्यस्पर्शपिंडु न
ष्टाः पतितापत्यवर्जिताः। पंचत्रिंशत्प्रकारेस्तु प्राप्नुवंत्यगतिं मृताः। पित्राद्याः पिंडदा
अस्तु स्वयोग्नेयं पुत्रजस्ततः। ततो नांदीमुखाप्तोकास्त्रायाप्य स्वमुखास्वयः। द्वादशैवंपि
तृगणास्तर्पिताः संततिप्रदाः। गतिहीनाः सुतादीनां संतानं नाशयंत्यतः। दंष्ट्राव्याघ्रादि
निहताः। गर्भे निपतंत्यमी क्रमात्। १० द्वादशास्त्रादिनिहताश्चावर्षप्रतिवालकं। १२ विषा
दिनिहता यत्र त्रिदशास्तु द्वादशास्वपि। वर्षेस्तु बालके ऊर्ध्वं रनपत्या नपत्यतो। अथ व्या
घ्रेण हन्यैते जंतुः। कुमारीगमनेन च। विषदाद्येवृत्तपर्ण्णगजे नृपदुष्ट कृता। राज्ञा
राजकुमारघ्नश्चौरेण पशुदंसकः। वैरिणा मित्रभेदी च वकटत्रिष्टिकृणत्रा। गुरुघाती
अष्टशल्यामृताश्चेव शौचसंस्कारवर्जिताः। अनक्रो हृष्टके मित्रदेश्च स्वंगिलिताः शकटाहताः।

चत्रायायां मसूरीश्रोत्रवर्जितः॥ द्रोही संस्काररहितः॥ श्वानानिक्षेपहारकः॥ तथा मृते
तकगतिः॥ शूकरेण विपासिकः॥ कृमिभिः कृतनाडीव्रक्रमेण वनछेततः॥ शृंगिणा शं
करद्रोही शाकटेन चूर्णकः॥ सूचकः पिशुनः॥ कृतघ्नो मेदिनीदत्तविक्रियायज्ञदानि
कृतौ दारुणा दक्षिणावारः॥ शास्त्रेण श्रुतिनिंदकः॥ अश्मना विप्रनिंदाकृतु विषेण कमति
प्रदः॥ उद्बंधनेन हिंस्रस्तु सेतुभेदी जलेन च॥ गोग्रासकृत्तेऽस्याच्च कवालनहिजाभूक विप
तौ॥ भ्रमरेण राजपत्नीदाश्च तीसारेण निःक्रियः॥ शाकिन्याद्यैर्म्रियते तत्र सदर्पाकार्य
कारणैः॥ अनध्यायेष्वधीयानो मृयंते विद्युताथ वा॥ अस्पृश्यस्पर्शसंगी च श्रांतिस्तत
दुष्टशास्त्रकृतोपतितो पत्यविक्रेता न पात्या द्विजरत्न कृतौ॥ अथ तेषां क्रमाणेव प्राय २१९
श्चित्तं विधीयते॥ कारयेन्निष्कमात्रेण पुरुषं प्रेतरूपिणं॥ चतुर्भुजं दंडहस्तं महिषासन

संस्थितं॥ पिष्टैः कृष्णतिलैः कुर्यात् पिंडं प्रस्थप्रमाणतः॥ मध्वाज्यशर्करायुक्तं स्वर्णखं
डेन संयुतं॥ अकालमूले कलशं पंचपल्लवसंयुतं॥ कृष्णवस्त्रसमाछन्नं सर्वौषधि
रि समन्वितं॥ तस्योपरि न्यसेद्देशपात्रं भक्ष्यैः फलैर्युतं॥ सप्तधान्ये च कलशे तत्र तं पुरु न्पुं.३
षं न्यसेत्॥ कृत्वोपरि च विन्यस्य पूजयेत्तं तद्रूपिणं॥ कुर्यात्पुरुषसूक्तेन प्रत्यहं प्रेत
तर्पणं॥ षडंगो अजपेद्रुद्रान् कलशे तत्र वेदवित्॥ यमसूक्तेन कुर्वीत जपहोमार्चना
दिकं॥ गायत्र्याश्चैव कर्तव्या जपस्वात्मविशुद्धये॥ दशांतिकः पूर्वं च दशांशं जुहुयात्ति
लैः॥ अज्ञातनामगोत्रेण प्रेताय सतिलोदकं॥ दद्यात्पितृतीर्थेन पिंडमंत्रमुदीरयन्॥
इमं तिलमयं पिंडं मधुसर्पिस्समन्वितं॥ दद्यात्तस्मै प्रेताय यः पीडां कुरुते मम॥ एकपिं
तिलमयदानमंत्रः॥ सजलान् कृष्णकलशान् तिलपायससंयुतान्॥ द्वादश प्रेतमुद्दिश्य

दद्याद्देवं न विज्ञो वा ततो निषिंचेद्धाचार्योदंपतीकजलोदकैः ॥ शुचिरक्तां वरथेरो मंत्रैर्व
रुणदेवतैः ॥ यजमानस्ततो दद्यात्राचार्याय च दक्षिणां ॥ ततो नारायणबलिः कर्तव्यः
शास्त्रनिश्चयात् ॥ एष साधारणविधिरगतीनामुदाहृतः ॥ विशेषास्तु पुनः कैश्चित्प्राहुः ॥ आदि
निहते धूपितेन व्याघ्रेण निहते त्रेतेपरं कन्यां विवाहयेत् ॥ सर्पदंष्ट्रे नागबलिर्देयः ॥ सर्प
स्तु कांचनः ॥ स्तु निष्कमितं देमं गजं दद्याज्जाहतो राज्ञा विनिहते दद्यात्पुरुषं तु हिरण्म
यं ॥ चोरेण निहते धेनुं वैरिणा निहते वृषं ॥ वृकेण निहते दद्यात् यथाशक्त्याथ कांचनं ॥
शय्यामृते प्रदातव्या शय्या तूलीसमन्विता ॥ निष्कमात्रसुवर्णस्य विष्णुना समधिष्ठिता ॥
शौनदीनेमृते दद्यात् विनिष्कं सुवर्णजं हरिं ॥ संस्काररहीने च मृते कुमारं चापवीतायतो ॥
निःक त्रयस्वर्णमितं दद्यादश्वं हयाहतो शुना हते हन्त्रपानं स्था पायनिज शक्तितः ॥ स्कं

२२०

श्राद्ध एकसप्त न्यो विवाह पत्र ४

रेण हते दद्यात् महिषं दक्षिणान्वितां ॥ कृमिनिश्चहते दद्यात् गोधूमान् पंचखारिकाः ॥ शृं
गेहते दद्यात् सो वर्णं रत्नसंयुतां ॥ शृंगिणा निहते दद्यात् वृषभं वस्त्रसंयुतं ॥ शाकटे
न हते दद्यात् रथं सोपस्करं शुभं ॥ भृगुपाते मृते विप्रः दद्याद्धान्यपर्वतं ॥ अग्निना निह
ते कार्यं मुदंपानं स्वशक्तितः ॥ दारुणा निहते चैव कर्तव्या सदने स्मृता ॥ शस्त्रेण निहते
दद्यान्महिषीं दक्षिणान्वितां ॥ अश्मना निहते दद्यात् सवत्सां गां पयस्विनीं ॥ विषेण च
मृते दद्यात् मेदिनीं हेमनिर्मितां ॥ उद्बंधनमृते दद्यात् कपिं कनकनिर्मितं ॥ मृते जलेन
वरुणं दद्यात् स्वर्णं त्रिनिष्कं ॥ विशूचिकामृते तत्र भोजयेच्च शतं द्विजान् ॥ तिलधेनुप्र
दातव्यां कंठे च वकलेन मृतो ॥ अपस्मारमृते कार्यं च्छ कृच्छ्रव्रतं तथा ॥ अतीसारमृते ल
क्षं गायत्र्याः प्रयतो जपेत् ॥ आकिंन्यादिव्यदयस्तो जपं कुर्यं यथोचितं ॥ विद्युता तेन च मृ

प्रपाद्ध ने ४

श्राद्ध सप्तद ने

X

तेविद्यादानंसमाचरेत्।अस्पृश्यचमृतेकार्यंवेदपारायणंतथा।सच्छास्त्रपुस्तकंदद्यात्कु
स्पर्शीनामृते।पतितेचमृतेकुर्यात्प्राजापत्यानिषोडश।मृतेचापत्यरहितेकृच्छ्राणांनवति
चारता।एवंकृतेविधानेतुविदध्यादूर्ध्वदैहिकं।नतथाप्रेतनिर्मुक्तिःपितरस्तर्पितास्तथा।द
द्युःपुत्रांश्चपौत्रांश्चआयुरारोग्यसंपदः॥इतिदुर्मरणेदुष्कर्मजायश्चित्तायाःकथनं।एते
षुतत्कर्मणांविवेकप्रतीकारेषुकर्मविधानेवक्रपादवक्रपाणिकाणखंजांधवधिरव
षंडत्वकुष्ठपाणिचर्मदंतुरत्वादीनांविपाकदानकरणंकर्मांतरेषुतुसंबंधननिमित्तैः
सिद्धिर्नवैदिकीतथैवगुल्मकासश्वासातीसारभ्रमहृद्रोगयक्ष्मवमनाग्निमांद्यप्रदरअ २२१
र्शआदीनांप्रतीकारदानादैहिकसिद्धिःपरत्रापिचानुसंधाननिवृत्तिरित्यवधेयेविचक्ष
णैः॥अथनवप्रतनामहालक्षनारवनीपिटकवायसमहाडाकिनादियरूपीडायांशांतिविधा

नाकथ्यंते।यथा॥तत्रसर्वंमतादुःखोद्वेजितमनसःशांतिःपरकार्यपरस्वंचविनाशय
तियःपुरासर्वदादुःखनिलयःसोद्वेगबहुलोभवेत्।तत्रादावेवंचांद्रायणद्वयंकुर्यात्।उ
दुत्यंजातवेदसमितिमंत्रेणनामसहस्रंचजपेत्।अच्युतानंतगोविंदनामोच्चारणभेष
जात्।नश्यंतिसकलारोगाःसत्यंसत्यंवदाम्यहं॥इतिवचनात्पुरुषसूक्तेनाष्टोत्त
रसहस्रंजुहुयात्।तिलानुगोमिथुनंचदद्यादिति॥इतिदुःखितमनसःशांतिः॥अथदे
शांतरगतानिकेतादरेक्षुत्पिपासातुरंश्रांतंनयनीतंगदातुरंआरक्षन्नाश्रितंचापि
नावकेशार्दिताधनीयोनिर्दयःप्राणिगणेपरोभवतिमानवः।सदेशीतरमासाद्यबहु
क्लेशार्दितोभवेत्।यश्चावतनेनपारणंनयोत्पादकःस्यात्।अतुकथनष्टपुपजीवा
सधनवतिमहत्कार्यज्ञातापिदेशांतरगतो।भतिक्लेशीभवति।सकृच्छ्रातिकृच्छ्रंचांद्रा

यणं कुर्यात्॥श्रीसूक्तेन वा कृतिनिश्याष्टोत्तरसहस्रं त्रीहिभिर्मधुघृताक्तां जुहुया
त्॥गणेशगायत्र्या चाष्टशतं सशर्करं जुहुयात्॥ब्राह्मणान्विप्रांश्च दीनदुःखिनांश्च भोजये
त्॥गणेशपूजां च कुर्यात्॥हिरण्यं दद्यात्॥इति सप्तशतीस्तोत्रं च जपेत्॥इति देशांतरगति
क्लेशहरशांतिः॥अथ ग्रहपीडायां प्रचंडग्रहो यः श्मशानवासी यत्र देवाग्निगुरुगोविप्रान्
स्पृशति। तं प्रचंडो नाम ग्रहः संश्लिष्यति। तेनाक्रांतस्तत्क्षणं देवमूर्छितगतिर्दरिद्रो भवति।
स तत्र प्रतीकाराय रुद्रं चांद्रायणं कुर्यात्॥वा तत्रावादा नैष्फलमिति जपेत्॥वस्त्रगोहिर
३ जो ण्यपृथ्वीभोज्यादिदानानि दद्यात्॥बलिमंत्रश्च पूर्ववत्॥शीतोष्णहरविधानवत्
ईश्वरालये कार्यः॥अवधूतमेकं भोजयेत्॥इति प्रचंडग्रहाक्रांतेमूर्छाहरशांतिः॥अथ २२२
कालायनकग्रहो दुःस्थानस्थितः सूर्यादिग्रहयोग्रह यज्ञनमकुर्वत्र विजानाति। तं का
ति

लनायको नाम ग्रहः समाक्रामयति। तेनाक्रम्यमाणस्तत्क्षणादेव शुष्कहृदयरास्ये शु ष्य
ष्यमाणदरी भवति। तत्र क्रियावान् त्रिमध्वक्तेन याज्ञियतरुबालपल्लवनजातवेदसे
त्वाष्टोत्तरसहस्रं जुहुयात्॥त्रिमधु मधुघृतदुग्धं प्राजापत्यं सहस्रचारं तो हिरण्यबलिं च
पि४ दद्यात्॥तत्र तिलाजाति लकच्छमध्याज्यरुधिरगंधपुष्पैश्च चतुष्पथे। तत्र मंत्रः॥प्रचंडका
लबलिं इमं कालनायक महाग्रह आतुरस्य सुखं सिद्धिं प्रयच्छ त्वं महाबलामंत्रः॥देशां
तराद्वग्भोजनदानं च॥इति कालनायकग्रहदुःखशोषहरशांतिः॥अथ पिटकग्रहो यः
परस्य मनस्तापं करोति। अनारण्ये नव्य वद्दहरति। तं पिटको नाम ग्रहः संश्लिष्यति। स तेन
क्रांतस्तत्क्षणादेवप्राणसंदेहकरव्याधिनाभिभूतो दरिद्रश्च भवति। तत्र चांद्रायणं कुर्या
त्॥श्रीसूक्तेन तरु घृताक्तां जुहुयात्॥द्वादशं च बलिं दद्यात्॥स्वयं रात्रौ चतुष्पथे॥स ह

तेनैव मंत्रेण पिटकग्रहसंज्ञया। इति पिटकग्रहजनितप्राणनाशयकरव्याधिशांतिः।
अथ कालग्रहो। अप्रक्षालितपादेनात्र तु कुत्रापि केपात्र तु कुर्यस्त्वं कालनामग्रहः संस्पृशा
ति। तेनाक्रांतमात्रो नरो हीपीतत्वं तु विण्मूत्रेण हरिद्रावर्णवान् भवति। सोत्ररूपत्रयैः कु
र्यात् वस्त्राद्यैश्च समर्चयेत्। उपसृत्यार्यविजिस्समं पायसलाजावस्त्रगंधपुष्पधूपदी
नारायसमीपमंत्रेण पूर्ववद्बलिं दद्यात्। सर्वप्राजापत्यमाचरेत्। कमण्येनेन तन्नि
मित्तं तर्प्पयेत्। इति कालग्रहाक्रांतस्यांतर्हीपीतनेत्रविण्मूत्रदोषशांतिः। एवमापद्ने
वग्रहस्तस्यापीतत्वघोरत्वश्च दिवतः शांतिः प्रावक्विधिना। ततः संशोध्य पात्रे दत्वा
त्र विशेषात्स्वयमात्मना भोजनात्। अतं आपस्तंबो नामग्रहो स्पृशाति। स तत्क्षणं हृदयोद २२२
रत्रोषी भवति। तत्र नारायणं कुर्यात्। सर्ववद्बलिदानं च। इत्यापस्तंबो। एवं मरावरग्र

हो। रजकचर्मकारादियोषितां गमने तृणं मद्रा हारग्रहो स्पृशाति। अंगे अत्यंत दाहज्व
रं किंकिशनायिरामस्यजुहुया भरण जातवेदस इति मंत्रेण अष्टोत्तरसहस्रकं सहस्र
नामस्तोत्रं जपेद्विष्णोः समादिष्टं ब्राह्मणान् संपूज्य दद्यात् बलिं निशि चतुष्पथे। तिलपिष्ट
तथान्नं च विविधगंधदीपकं। अजारुधिरसंयुक्तं पुष्पधूपसमन्वितं। प्रतिशृङ्गी भेति
पूर्वोक्तेन मंत्रेण वेदिनां भोजनं दद्यात्। ततो रोगात्प्रमुच्यते। इति मलहारग्रहो। अथ पु
त्रग्रहो। अनिवेद्य सुरामांसं अन्नं हंतं हायन्नयः पुत्रग्रहः संस्पृशाति। कृदिशोपी नवे
त्। ततः अष्टोत्तरसहस्रं तु गायत्र्या जुहुयात् घृतं। गायत्री दशसाहस्रीं जपेद्यात् चकां चनं।
बलिं च पूर्ववत्कुर्यात् पूर्वमंत्रेण यत्नतः। ब्राह्मणान् तर्पयेद्विप्रान् ततो दोषात्प्रमुच्यते। इ
ति पुत्रग्रहो। अथ लोकायतिग्रहो। देवालयं शिलाप्रहमारुह्य मलमूत्रं त्यजेत्। लोकायति

कनामा सग्रहेणैकं तु गृह्यते। तेन गृहीतमात्रो वमनं पित्तोद्रेकी ज्वरपाण्डुवर्णवक्त्रनेत्रो
मूत्रपुरीषोत्तवति। आस्याद्दाद्दन्तवृणी भवति। तत्र उपवासत्रयं कुर्यात्। उध्यान्ते तंत्रा
तं जपेत्। दक्षिणस्यां जलं दद्यात् पिण्याकपायसजलगुडादिधूपदीपाच्छादनमप्रमं
कुण्ठ्यायां बलिं निक्षिपेत्। मध्याह्ने मध्यरात्रे वा। तत्र मंत्रः। प्रगृह्णीष्व बलिं चेमं लोकायाति
महाग्रहो। आतुरस्य सुखं सिद्धिं प्रयच्छ त्वं महाबल। इति ऋचा नरं सम्यक् प्रदद्यात्। इति लो
कनं। नानावर्णजनेभ्यः अवंततो दोषाद्विमुच्यते। इति लोकायतिग्रहः। ततः शिवपादग्रहो
गुरून् देवांश्च पित्तरोयो ह्यवज्ञाय आत्मानं अधिकं पश्यति। तं शिवपादो नाम ग्रहः सं
गृह्णाति। तेनाक्रान्तः सद्य हरीकरपाददाहीनवति। तत्र चांडायणं कुर्यात्। बलिं वस्त्रान्न २२४
गंधधूपदीपाः नानापिष्टतिलसक्तवं इत्यादि निर्मार्गद्वय संगमे मंत्रेण बलिं दद्यात्।

मंत्रः। पूर्ववत् एवमस्य तुष्टिवपादिसंज्ञया॥ इति शिवपादोष्ठहस्तपाददाहकरोगतिः॥
अथ कपिलग्रहः। यः पुनर्देवालयेन दीतीरे वृक्षमूले च वनेस्तु करोति ष्ठीवति वा मल
मूत्रं करोति वा। तं कपिलो नाम ग्रहः संगृह्णाति। तेनाक्रान्तस्तादेव ज्वरस्तम्भी हस्तीन
सर्वांगदाहदीपीतनयनश्च भवति। तत्र त्रिरात्रोपवासं चासोमारुद्रावा जपेत्। दक्षिणस्यां द
द्यात्। निशि चतुष्पथे बलिं च दद्यात्। पिष्टं लाजापिण्याकरुधिरतिलधवलागंधपु
ष्पैः पूर्वमंत्रेण दद्यात्। ब्राह्मणत्रयं भोजयेत्। इति कपिलग्रहोष्ठज्वरस्तम्भकर
सर्वांगदाहपीतनयनदोषहरो॥ अथ ऊर्ध्वग्रहो सूर्यचन्द्रोपरागे च योगिनी संयोगि
नं ग्रहो नाम ग्रहः संगृह्णाति। तेन गृहीतमात्रः कंपी रुद्राग ज्वदकं वेवामष्टश्लीवि
वर्णः पीतनयनश्च भवति। क्रमेण रुधि मानपि भवति। तत्र पिपीलिकामध्ये सो गायत्री

कुर्यात्॥ गुरुणा सूक्तं रुद्रसूक्तं अग्निरस्मिन् मंत्रं जपेत्॥ मांसमुक्तपोलिका गंधपुष्पधूपैर्दध्यो-
दनादिभिरन्यच्च निवेद्यं दक्षिणां दद्यात्॥ अन्नबलिको चतुष्पथे निक्षिपेत्॥ इति
तृतीयग्रहजकंपकार्श्ययोगजदकं श्वासकासज्वलनविवर्णतिपीतनयनदोषहरं॥ अथ ऊर्ध्वक-
ग्रहो कारणमंतरेण न्यस्त्रा प्रहारिणां परदोषमविज्ञाय दंडपातिनं॥ ऊर्ध्वकेशो नाम
ग्रहो गृह्णाति॥ तत्तस्यांगेषु स्फोटा जायंते॥ तत्र लक्षचांद्रायणं कुर्यात्॥ चरुघृतं वा नैरो-
द्रव्यात्कन्याकुनित्तिश्च जुहुयात्॥ हिरण्यं दद्यात्॥ बलिं च पायसकंदलाजादूपपुष्प-
धूपदीपवस्त्रगंधस्कृतादिनां सपात्राणां शं भंमुच्य चतुष्पथे पूर्वमंत्रेण कुर्यात्॥ इति
ऊर्ध्वकेशग्रहे सर्वांगस्फोटेषु प्रतीकारः॥ अथ विष्टनाहयं देवसश्रिमाचारहीनं विष्ट- २२५
ता ग्रहो नाम गृह्णाति॥ तेन कर्णो नो हस्तपादतलेषु स्फोटा भवंति॥ विश्वनीहरी बधिर

भवति॥ तत्र चांद्रायणं चरेत्॥ गुरुणा सूक्तेनाग्रपद्मावेरशोन्नरसहस्त्रं जुहुयात्॥
सहस्रनाम्नां श्रीविष्णोर्जपेत्॥ घृतदधिपायसक्षीरपक्वपिष्टध्वजादिहिरण्यवस्त्रतांम्र-
पात्रपुष्पगंधादि स्थलकं तं चतुष्पथे पूर्वमंत्रेण बलिं दद्यात्॥ इति विष्टनाहग्रहे ह-
स्तपादतलस्फोटहरणबाधिर्यत्ता॥ अथ नवग्रहः॥ सन्दितपस्विगुरुस्वामीसंबंधिगामि-
नं नवग्रहो नाम गृह्णाति॥ तस्य मेहदाहास्फोटाश्च भवंति॥ आध्मानात्र नयनरोगा वा॥
तत्र पंतन तत्र लक्षहृदयं कुर्यात्॥ प्राजापत्यमपि कुर्यात्॥ तिलक्षचांद्रायणं समक्तं यक्तं वा व्याम्न- ४५
नविधिना दोश्रीश्च तं च दद्यात्॥ निष्कद्वादशकं वा॥ कूष्मांडहोमः॥ पुरुषसूक्तोक्त पद्मजा-
तेन तस्य सर्वं वा तनिशात्या बालणे तोजनं च दद्यात्॥ तथा बलिं स्थलकं नेनिक्षिप्य व-
स्त्रेण वेष्ट्य यन्नतः नालिः पर्युषितान्नं च पताकाध्वजस्पंदतो लघुपुष्पधूपादिभिः सह

यित्वा चतुष्पथे मंत्रेणानेन दद्यात्॥ प्रगृह्णीष्व बलिं चेमं नवग्रह महाबला। आतुरस्य
सुखं सिद्धिं प्रयच्छ त्वं प्रसीद मे॥ बलिदान मंत्रः॥ अथ वायसग्रहः॥ देवद्विजान् हेत्रत
डागवल्मीकादिषु विष्टामोचकं वायसो नाम ग्रहः संक्रामति। तेनाक्रांत आध्मानी करी
अरुचिमान्द्याग्नि दाहीच भवति। तत्र पूर्वं तच्चमाचरेत्। व्याहृतिभिराज्येन जुहुयात्।
हिरण्यं च दद्यात्। घृत तक्र पीनाद्यं नैवेद्यं घृतदीपादिभिः संध्यायां प्रदोषकाले चतु
ष्पथे पूर्वमंत्रेण बलिं दद्यात्॥ इति वायसग्रहः॥ अथ आध्मानरुचिपादस्फोटदोषप्र
दं॥ अथ महाजिकग्रहः॥ सुशालो वृक्षवल्लुक स्तन्मार्ज्या मधूदुंबरादीनां परित
परित पावशनात्पादारोहणाच्च महाजिको नाम ग्रहः संक्रामति। तेनाक्रांतमात्रः श्वासी
शोषी गजदवा कुजिका ग्रणी व्रणी कंपी च भवति। त्रिरात्रं उपवासं कुर्यात्। व्याहृतिभिरा

ज्येन जुहुयात्। उदुत्तरं गायत्रीं जपेत्। अन्नं च दद्यात्। बलिं च पक्वापक्व मत्स्य मांस सु
रा रुधिर स्नूप शाकान्न गंधादिभिः चतुष्पथे पूर्ववन्मंत्रेण बलिं दद्यात्। मध्याह्ने मध्यरात्रे
वा। कन्यकात्रयं भोजयेत्॥ इति जिकामलाग्रहः॥ अस्यरोषश्वास गजहाघतिदाहहरं।
अथ क्षेत्रपालग्रहः॥ निद्रायां क्षतिदत्तानां क्षेत्रपालः प्रपीडयेत्। आतनक्रांतमात्रो सुखशो
षी जिह्वा व्रणी च भवति। न तस्मादृत्तनाथांश्च पूर्वं संस्थाप्य पूजां च मंत्रेण कुर्यात्। पूर्व
वन्मंत्रेण बलिं दद्यात्। अवधूत योगिनां भोजनं च॥ इति क्षेत्रपालग्रहः॥ सुखशोषजिह्वा
व्रपादोषहरं॥ अथ हस्तपादग्रहः॥ वस्त्र धान्यादीनां मुषित्वा मूल्यादग्रीवकं गृह्णतो ह
स्तपादग्रहः संक्रामति। तेनाक्रांतमात्रो हस्तपादस्तंभी वक्रग्रीवः कृटिव्याधिमान् दरिद्रा व
र्णनयनश्च भवति। स तत्र त्रिरात्रमुपवसति। व्याहृतिभिराज्येन जुहुयात्। उतवात हिरण्यं

दद्यात्। अन्नं पिष्टं क्षीरं गंधादिभिश्चतुष्पथे तथा काले बलिं दद्यात्। ॐ ह्रः क्लीं घ बलिं च
मं गृह्ण गृह्ण पादय पादय हन हन। आतुरस्य सुखं सिद्धिं प्रयच्छ त्वं महाबला। इति दन्तपादग्रहोच्छतुजां
क्रिस्तंतत्कं वकटिपांगीपीतनयनदोषहरं लक्ष्मीकव्याधिहरं च। अथ कर्णग्रहः। परनिंदा
पैशून्यश्रवणश्रावणाच्च कर्णग्रहो गृह्णाति। तेनाक्रांतकर्णः शूली भवति। दशाश्राः ततः सुरा
मांसान्नतिलपिष्टलाजाकंदमूलफलपुष्पादिभिश्चतुष्पथे रवौ काले बलिं दद्यात्। ॐ ह्र
क्लीं घ बलिं च इमं कर्णारिष्टमहाग्रह। आतुरस्य सुखं सिद्धिं प्रयच्छ त्वं महाबल। इति कर्णग्र
हजातकर्णपीडाशूलरोगशान्तिः। अथ वेतालग्रहः। बंधुसुदाप्याण संपादयति। उपकर्तुरु
पकरोति यस्तं च वेतालो नाम ग्रहः संक्रमति। तेनाक्रांतमाश्वासी कासी ज्वलान्नमस्मद्दमानः २२७
सर्वांगरोगी हृतकल्पश्च भवति। तत्र रुद्रत्रयं कुर्यात्। श्रीदिक्षोः स्मृदस्मकशाल्मिणक्षौ।

कूष्मांडैः कूष्मांडमंत्रैश्च पक्वान्नकयानक्षिन्नस्तकं उपेतं बलिं च अन्नं दधि सक्तु चूर्णरुधि
रक्षीरसूपवस्त्रगंधादिभिः हिरण्यजलचूर्णकं तेनिशि चतुष्पथे बलिं दद्यात्। पूर्व
मंत्रेण। इत्यवतारग्रहजनितबालकासज्वरानहेषमृतकल्प। अथ स्कंदग्रहो बाल
ग्रहसंचारे उच्छिष्टं बालमादाय स्वयमुच्छिष्टो वा अग्निं स्पृशति। यः स्कंदग्रहः संक्रमते।
तेनाक्रांतमात्रस्य करपादास्येषु वायुर्बलवानाक्रमति। उक्तं च महाभारते। स्पृशंतं व
क्रिमुच्छिष्टं बालमादायमानवं स्कंदग्रहो गृह्णाति ग्रहस्तं वै स्कंदो नाम महाबलः। तस्य पादस्य
हस्तेषु विकारो नायुजो च न वेदिति वचनात्। तत्र सक्तु दधि क्षीरसु कशर्करा न सूपतिलपि
ष्टमुद्गराजमाषनिष्पावकमयवगोधूमा मस्सुरा चूर्णकं न कांस्यपात्रं वस्त्रयुग्मं संवेष्ट
नादि रक्तसूत्रकर्कटरक्तमाल्यांबरादिभिर्मंत्रेण बलिं दद्यात्। ॐ ह्र क्लीं घ बलिं चेमं

स्कंदग्रहस्तु पूजितः। आतुरस्य सुखं सिद्धिं प्रयच्छत्येव महाबलात् तस्याग्निप्रतिष्ठाप्य स्वाप
त्रतिकांस्य स्वाहेति मंत्रा त्स्यां हीर घृत सर्षपान् जुहूयात्॥ ॥ द्रोण मात्र पक्वान्न पक्वाप
क्व मत्स्य तथा मांस दधि पिष्ट तिल पिष्ट रुधिर हिरण्य रक्त चंदन वस्त्र गंध पुष्पादि दत्त
मूले प्रदोष समये बलिं दद्यात्॥ पूर्वमंत्रेण दद्यात्॥ इति स्कंदग्रहोत्पादित कर पाद
स्य वा सुविकार हरं॥ तथा च॥ उच्छिष्टं बालमादाय श्वा यानं व्रतचंगिने। तं यस्कातिग्रह
स्कंदस्याधमानी हरवान् भवति। श्वासवान् रक्तनयनो वक्रभ्रूत्र पुरीषवान्। पार्श्वयोः प
रितापार्त्तश्च रुचिः। सबलिं हरेत्। तत्रादि हिरण्यं पायसं वस्त्र रक्त चंदन मकुशिमामण
ऊर्द्धटमो। सिद्ध फलैर्मूलैर्वटस्य चावट मूले मध्यरात्रौ पूर्वमंत्रेण निक्षिपेत्॥ इति स्कंद २२८
ग्रहार्त्तस्य आधमान हरः॥ अथ मेषग्रहो बालमादाय आस्फानेन सनमर्दन रोदनादीनि

निनिर्द्धने वनो। वृक्ष मूले देवालये जलाशये वा त्रस नुरोदनादीनि निद्रां वा ऊर्ध्वं तं मेषो
नाम ग्रहो गृह्णाति। सर्वांगेषु वासुः प्रकोपवान् बालं हरी च निमिषनेत्र ऊर्ध्व दृष्टिः। फे
निलास्यो वा मद्हस्त पाद कंपनाद्यस्य भवति। तदुपशांतायादि हिरण्य श्वेत वस्त्र पायस
सकुल्माषा पूपगंध पुष्पादि सर्वदंतेन च वा निशीथे। शस्त्र पाणिः प्रशस्तो घेति पूर्वमंत्र पुत्र र
नू बलिं दद्यात्॥ तु प्रथोग्रामनिर्गमे वान सर्वं ब्राह्मण शस्त्रीया नृ॥ इति मेषग्रहे सर्वांगवा
सुविकारा पुष्ट्राण हारक नेनो भीन नप फेनिला दृष्टि हस्तादिकं पदोषेषु॥ अथ शिशुग्र
हो। दिव ब्राह्मण गा गुरु चार्यच वज्रा कारिणं शिशुग्रहः संक्रमात् तदा हरान्ति नारास्य शोष
हस्त पाद कंपनादि दापी च भवति। तच्छांतये घृत लाजा मांस कूर्द्ध टमेष रक्त चंदन हिरण्य
पुष्पकं नादि निर्वट मूले पूर्व मंत्रेण बलिं दद्यात्॥ इति शिशुग्रहे हरान्ति नारास्य शो॥

न्हस्नादिकं परं॥ अथ महासप्ततनायहो॥ अदंष्ट्रा तु दंडयंते च दंष्ट्रा नो नाथ दंडकं। स्वैरं
नृपं वा मनिवंशकृते सप्ततनायहः। तं तंत्रपादिकं महेत्पन्मस्तं तद्या पारपरन रंधुक्ता सुक
ममीद्रपथवद्दरं तं महासप्ततनायहः संक्रमते। ततो तिसारी भवति। तत्र हरिद्रा च तिल
पिष्टदध्योदन गंधपुष्पहिरण्यसुवर्णकं नादि स्तडागोपकंठ बलिमादध्यात्। प्रदोषे ते
न मंत्रेण नीलांबरधरा देविसप्ततान विततनानाविशिष्टं विकारान्मुंचे मे गृह्णी अबलिश्च
नां। ततः कन्यात्रय भोजनं दद्यात्॥ इति महासप्ततनायहोयामतिचारदोषः॥ अथ रेवती
ग्रहो संध्याकाले मुक्तशिरा उच्छिष्टशयने रतः रेवती ग्रहः संक्रमते। तदा देवास्य शोषी दा
हीकंपी रक्तवर्णश्च भवति। ततो घृतलाजापायसकुर्कुटामिषर नवंदनरक्तवस्त्र हि २२९
रण्यगंधपुष्पसुवर्णकं नादि वटशमीमूलेनेन मंत्रेण बलिं दद्यात्। विचित्रांबरधरा द

विचित्रमाल्यानुलेपनी। विशिष्टं विकारान्मुंचे मे प्रगृह्णी अबलिश्च नां कन्यात्रय भोजनं॥
रेवतीग्रहो नष्टास्य गोमहादकं पुरुषावर्षेषु॥ अथ कद्रूसप्ततनायहोयोन्तयाध्नो वा
सौहाद्धा पित्र्यादीनो श्राद्धानि न करोति। तं कद्रू सप्ततना संक्रमते। ततो शिरोग्री हरीका
सी दिवा निद्रा न क्तं विनद्री च भवति। तत्र मांसान्नरुधिरवस्त्रपुष्पगंधहिरण्यसुवर्णकं
नादि महावृक्षमूले प्रदोषे नेन मंत्रेण बलिं दद्यात्। चमूर्द्ध सप्ततान देवि प्रगृह्णी अब
लिविमां विशिष्टं विकारान्मुंचाश्च स्तु नगेनकृदर्शनात्। तत्र कुमारीभोजयेत् कं चुकं दद्या
त् पक्वफलं च॥ इति कद्रूसप्ततनायहोश्चरिरोगहरका समराना वनिवृत्तायां॥ अथ शकुनि
ग्रहो उच्छिष्टे भोजने देवालये मलमूत्रोत्सर्गकारिणं शिशुं शकुनिः संक्रमते। तदादि
मुखदंगे पाके च व्रणी भवति। ज्वरी अतिसारी रक्ताशिररोदी च भवति। तत्र हरिद्रा च
दे

तिलपिष्टघृतचंदनसुरालाजाहिरण्यपूर्णकेनपक्वमांसगंधादिभिर्नद्यांगोष्ठेवानेन
मंत्रेणबलिंदद्यात्॥ग्रहक्षीघबलिंचेमंशकुनेवंमहायदारिशुंविकारान्मुंचेमंयवीरि
ष्टंविनाशय॥इतिशकुनिग्रहः॥मुखकंठपानत्रणरोमातिचारबहुरोदनादिस्यु॥अथम
हारेवतीग्रहोऽष्टवर्षेथितिरात्रिकृएधर्मकर्मणिबालानांस्त्रीधनपिनोगिनीरेवतीमा
ग्रहःसंक्रमातातस्यबालाविण्मूत्रवलिप्ताहरिद्रांगवर्णस्फोटवंतश्चभवंतितदुपशां
तयेसर्वेतिमंत्रेणसर्वोक्तंबलिंदद्यात्॥सर्वोक्तंरेवतीग्रहविकारान्नः॥इतिद्वितीयारेव
त्यांविण्मूत्रलिप्तपीतवर्णस्फोटादिदोषा॥अथशुष्कारेवत्यांचूमोपतितंछर्दिनंरुदंतं
बालंसायंमध्यमकेवाशुष्कारेवतीग्रहःसंक्रमातानतःस्थलीहरीकृतशोषीत्रजीर्णमन्नंच २३०
भवति।मतन्मुजाननश्वेतवस्त्रैश्चगंधपुष्पसुरासमांसधांमूलेमंत्रेणबलिंदद्यात्

त्रिशागमेकरालवदनेदेविघोरेग्रहक्षबलिंचिमं।बालकस्यसुखंसिद्धिप्रयच्छत्वंमत
बलोपानीयंपायसंवस्त्रंदद्याद्द्विप्रेषुवेततः॥इतिशुष्करेवतीग्रहो॥जलदारुकोषा
जीर्णस्थूलास्तनाग्रहाचुल्काप्रक्षालितपाणिपादःशय्यासनादीनिनांडानियंस्य
त्रातितंलक्ष्महतनाग्रहःसंक्रमतिततोर्बुदीदेहकंपीरुदनूनिशिविनिद्रोदिवास्वापी
भवतितत्रतिलपिष्टान्नदधिलाजाहिरण्यप्रसूर्णकंनादिवस्त्रगंधपुष्पधूपदीपप्रनृ
तिक्रोशस्थानेप्रदोषेबलिंदद्यात्॥नीलांबरधरलक्ष्मीहतानविहतानिनिशिशुंविका
रान्मुंचाशुंप्रवृक्षोघबलिंचिमं॥इतिलक्ष्मीशिशुहतनाग्रहो॥अर्बुददेहकंपनिद्राविरक्ति
दोषु॥अथबालरक्षाप्रसंगेनबाणगर्भिण्यारोगेप्रायावप्रतिपालनार्थमासविशेषे
बलिविशेषोनिधीयते॥तत्रयथाश्वेतवस्त्रेणपायसघृतचंदनकैवहिरण्यजलपूर्णै

नादिभिर्गोदोहस्थाने प्रथममासगर्भिणीगर्भोद्देशेन बलिं प्रजापतये दद्यात्। तत्र मं-
त्रः। एह्येहि भगवन् ब्रह्मन् प्रजाकर्तः प्रजापते। प्रगृह्णीष्व बलिं चेमं सापत्यां रक्ष गर्भि-
णीं॥ इति तद्दत्वा यवसदध्यन्नलाजातिलपिष्टवस्त्रहिरण्यध्वजलड्डुकं चगंधपुष्पादि-
भिरश्वत्थां पूर्वस्थाने द्वितीयमासि गर्भिणीगर्भमुद्दिश्य बलिं दद्यात्। आगच्छेनं
महाभागो देवावैद्या विहाश्विनो। प्रगृह्य बलिं नेमं तु परिपाल्यादि गर्भिणीं॥ इति तद्द-
त्वान्नलाजाश्वेतवस्त्रहिरण्यध्वजगंधादिभिः पूर्वस्थाने एकादशरुद्रेभ्यः तृतीयमा-
सि गर्भिणीगर्भोद्देशेन बलिं दद्यात्। रुद्राश्चैकादशाः प्रोक्ताः प्रगृह्णीध्वं बलिं चेमं युष्मा-
न्माद्ययावेदं नित्यं रक्षंतु गर्भिणीं॥ इति रक्तान्नध्वजगंधपुष्पवस्त्रहिरण्यतिलपिष्ट- २३१
लाजादिभिस्तृतीयमासगर्भिणीगर्भमुद्दिश्य पूर्वस्थाने बलिं दद्यात्। आदित्या द्वादशं

श्रेष्ठाः प्रगृह्णंतु बलिं चेमं युष्मान्माद्ययावेदमिमां रक्षंतु गर्भिणीं॥ इति तद्दत्वाका-
न्नमांसच्छागस्थरक्तान्नद्राक्षाफलमाध्वीपिष्टीसुराशर्करामधुकसक्तुतिलपिष्टपूप-
लाजादिरण्यादिभिः सहकारमूले चतुर्थमासगर्भिणीगर्भोद्देशेन नागामयं विनायकं
रत्वा वस्त्रचंदनगंधपुष्पादिना संपूज्य अनेन मंत्रेण बलिं दद्यात्। विनायकगण-
ध्यक्ष शिवपुत्र महाबलाप्रगृह्णीष्व बलिं चेमं सगर्भां रक्ष गर्भिणीं॥ इति तद्दत्वा यवघृ-
तशर्करालाजाहरिद्रान्नहिरण्यध्वजपूर्णकुंभवस्त्रद्वयगंधादिभिः नदीतीरे पंच-
ममासगर्भिणीगर्भमुद्दिश्य बलिं दद्यात्। वसवस्त्वष्टसंख्याकाः प्रनाम्ना तन्मुखा-
काः प्रगृह्णीष्व बलिं चेमं इमां रक्षंतु गर्भिणीं॥ इति तद्दत्वा षष्ठमासगर्भिणीगर्भोद्देशेन स्कं-
दाय पूर्ववद्बलिं दद्यात्। मंत्रः। स्कंद षण्मुखादेवेशपुत्रप्रीतिविवर्द्धन। प्रगृह्णीष्व

